# तृतीयोऽध्यायः

1. धनुर्वेदसंहितायां वर्णितशस्त्राणां परिचयः उपयोगिता च

2. धनुर्वेदसंहितायां प्रतिपादितलक्षणानां समीक्षा

# 1.धनुर्वेदसंहितायां वर्णितशस्त्राणां परिचयः उपयोगिता च

'' युक्तिकल्पतरु '' नाम्नः ग्रन्थे महाराजाधिराजेनभोजराजेन अनेकानि विविधानि विषयानि विवेचितानि। तत्र पूर्वादीनां लक्षणं, नगरनिर्माणलक्षण, छत्र ध्वज, दण्ड–कुम्भादीनां लक्षणं, अलंकारपरीक्षा, मार्गपरीक्षा, गो – अश्व– मृग–सारमेय–महिष – वृषभादीनां पश्यतां परीक्षादि महत्वपूर्ण –विषयान स्वीकृत्य ग्रन्थालेखनं कृतम्। तस्मिन्नग्रन्थे अथाशस्त्रयुदिक्तं नामाध्याये अस्त्रशस्त्रस्यवर्णनायमपि विस्तरेण प्रदीयते। तदनुसारेण शस्त्रस्य गणना यथा–

खड्गचर्म्म–धर्नुषबाणौ शल्वभल्लौ तथा परौ।
अर्धचन्द्रश्च नाराचः शक्तियष्टिी तथापरे।।
परशुश्चक्रशुले च परिधश्चैवमादयः।
अस्त्रभेदाः समुद्दिष्टाः श्रीमद्भोजमहीभुजा।। [1]

भोजानुसरेण –

**1.खड्गः**

1. चर्मः
2. धनुषः/बाणः
3. शल्वः
4. भल्लः
5. अर्धचन्द्रम्
6. नाराचम्।
7. शक्तिः
8. यष्टिः
9. परशुः
10. चक्रम्
11. शूलम्
12. परिधिः इत्यादयाः अस्त्रभेदाः वर्णिताः सन्ति।

ग्रन्थे आचार्यवात्स्यायनमतमपि दर्शितम् । अस्त्रगन्तुम् द्विविधं प्रोक्तं निर्म्माय मायिकं तथा ।[2]

**द्विविधमस्त्रम् यथा–**

1. निर्म्मायम्
2. मायिकम् [3]

| **खड्गादि निर्म्मायशस्त्रम्** | **दहकादिमायिकम्शस्त्रम्** |
|---|---|
| 1. खड्गः | 1. दहनम् |
| 2. चर्मः | 2. जलम् |
| 3. धनुषबाणौ | 3. काष्ठम् |
| 4. शल्वः | 4. लोष्ठम् |
| 5. भल्लः | 5. शब्दञ्च |
| 6. अर्धचन्द्रम् | 6. तैलादीनां |
| 7. नाराचम् । | मायिकस्त्राणि सन्ति। [4] |
| 8. शक्तिः | |
| 9. यष्टिः | |
| 10. परशुः | |
| 11. चक्रम् | |
| 12. शूलम् | |
| 13. परिधिः इत्यादयाः । [5] | |

अत्र कवचमंपि अस्त्ररूपेण स्वीकृत्य तस्य लक्षणं तथा गणभेदाः ईदृशी प्रकटिता सन्ति। यथा –

दुर्भेद्यत्वे तु कथितः कवचे गुणसंग्रहः।'' [6]

दुर्भेद्यता कवचस्य महत्वपूर्णं गुणमस्ति। इति दर्शित्वा सच्छिद्रताख अतिगुरुता, तनुता, सरकभेद्यतादीनां कवचस्य दोषनापि निर्दिश्यते। तत्पश्चात् कवचानां वर्णो विनिदिष्टः। [7]

यथा ब्राह्माादि क्रमशः ––

| | |
|---|---|
| ब्राह्मणः | श्वेतकवचम् |
| क्षित्रियः | रक्तकवचम् |
| वैश्यः | पीतकवचम् |
| शूद्रः | कृष्णकवचम् [8] |

केचित्कुशलाः कर्मकर्तारः धातुः कवचं निर्माणं कुवन्ति। तैः अपि यथाक्रमेण ––

| | |
|---|---|
| ब्राह्मणः | कनकनिर्मितकवचम् |
| क्षत्रिय | रजतनिर्मितकवचम् |
| वैश्यः | ताम्रनिर्मितकवचम् |
| शूद्रः | लौहनिर्मितकवचम् [9] |

**खड्ग परीक्षा –**

अङ्गं रूपं तथा जातिनेत्रारिष्टेति भूमिका।
ध्वनिर्माणमिति प्रोक्तं खड्गशानाष्टकं शुभम्।। [10]

अर्थात् अङ्ग, नेत्र, रू जाति, अरिष्ट, भूमिका, ध्वनि, अष्टज्ञानानि तैः आधारेण खड्गपरीक्षा करणीयम्। निपुणैः खडगे पञ्चधा कृत्रिमाः सम्भाव्यन्ते। ते अन्त्यावंकृत्रिमौ, सहजौ च रोपयति। [11]

खड्गे शतमङ्गानि, चत्वारिरूपाणि जातयः, तथा च त्रिंशनेत्राणि, तथैवारिष्टानि, द्विविधा भूमिश्च, ध्वनिरष्ट्रविधौ मानन्ति द्विविधं च प्रोक्तंमिति।[12]

**अ›म् –**

अभिन्ने दृश्यते यादृग विभिद्य धृष्टि ते तथा।
यदेव दृश्यन्ते चिन्हं तदङ्ग संप्रवच्छते।। [13]

भेदनेन विना यथा दृश्यते तथैव भेदानन्तरं योजयित्वापि यदेव दृश्यते चिन्हं तदेव संप्रचक्षते। लोहार्णव ग्रन्थे खड्गस्य शता›ानि गणना कृता। तद्यथा ––

रुप्य–स्वर्ण गज–उरुबुक–मदन–स्थूलाङ्ग–कृष्ण–अरुणः।
श्वेत–अम्भोज–गद–अतिमाननकला–ग्रन्थि–स्थिरा तैत्तिराः।।
मला–जीवन–षडपद अतिमानन उर्ध्व–मरीचि–व्याल–अश्व–
वर्हा–अञ्जन।
क्षौत्र–क्षुद्रक–मक्षिका–तु–यव–ब्रीहि–क्षमा–सर्पणाः।।
सिंही तण्डुल –गोशिर–शिव–नख–ग्राह्याक्षि–केश–उपल–
द्रोणी –काका– कपाल –यत्र – तुवरी – बिम्बीफली –सर्षपाः।
नीली–रक्त–वचा–रसोन–सुमना–जिह्वा(ह्वी) सङ्गमी–रोहित–
प्रोष्ठी–मरिष मार्कवाथु खर–तडित–मेघ–आर्द्र–गुंजा–शिवाः।।
मूर्व्वा–वज्र–फलाय–चम्पक–वनव–न्यग्रोघ–वंश–आशनाः।

ज्येष्ठी–जाक–पिपीलिका–अनल–रजः–कुष्माण्ड–रोम–स्पृही –

कर्कन्धु–वकुला–रसाल–महिष–स्वच्छर्तु–वक्रा इति।

प्रोक्ता लोहविशारदेन मुनिना खड्ग खड्गस्य भेदाः क्रमात्।।[14]

ग्रन्थेऽस्मिन् प्रथमतोऽङ्गानां लक्षणानि निबोधतः एवं मुक्त्वा राज्ञेन अ›लक्षणानि कथितानि यथा –

**लोहप्रदीपग्रन्थे –**

रोप्यपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते।

उर्ध्वं तत्तु महामूल्यं रुप्यवज्रमुशन्ति तम्।।[15]

अर्थात् रोच्यपत्रसम भूमिरङ्गं श्वेतं दृश्यते एषः समुन्नतश्च रोपयेवमहामूल्यखड्गश्रेष्ठः।

दद्याल्लक्ष्तीतार्युशोबलम्।[16]

एषः खड्गश्रेष्ठो प्रिय–पवित्र सुन्दरश्चेति मन्यते।[17]

**स्वर्णवज्रः** –

एषः श्रेष्ठः खड्गवरो लक्ष्मीमायुर्यशबलानि दीयते। निकषोपमा यद्रूमौ तन्वी स्वणरेखाबली अस्ति चेत् सः स्वर्णव्रजेति उच्यते।[18]

**गजवज्रमिति नाम खण्ड्गः –**

येन खण्डगेन आयुर्लक्ष्मीर्जयः प्रदत्तः यस्य खण्डगस्य अ› गजशूण्डाकृत्यैव भूमौ कृष्णायां सम्भवा स्यात् सः गजवज्रमिति प्रोच्यते–रम्तस्वर्शमात्रेण तद्विशेत्।[19]

तस्य अम्भसा प्रक्षालनात् ज्वरादिव्याधिगमनं भवेत् चेत् सः गजवज्रमिति उच्यते।[20]

येन खण्डगेन क्षीणोऽपि नपृः तत्खण्उगबलात् मही साधयेत्ि।

**रुवुव्रज्राख्यखण्डगः –**

एरण्डबीजप्रतीयं यस्या› च यस्य भूमिः श्वेतेतरा कृष्णास्ति चेत् एषः एषःवज्रुखण्डग नाम्नाख्यातः।

सः खण्डगः शत्रुणां दर्पः क्षयकरञ्च तस्य स्पर्शमात्रेण नरः सम्यकतयः विमुच्यते।[21]

केनचित् एवं खण्डंगं महिषमपि उच्यते –

महिषाक्ष्यमिदं वज्रं केचिदार्हुर्मनीषिणः।[22]

दमनं वा दमदाख्य वज्रं (दमदवज्रम वाम खण्डगम्)

यस्मिन् खण्डगे अ› दमनं किं वा कमलयत्राभं प्रतीयते। एषः खण्डगः दमनवज्र नाम्ना प्रकीर्तितः। तस्य खण्डगस्य प्रकारद्वयमस्ति। खण्डगस्य भूमिः श्वेता–शुभ्रा च भवेत्। द्वयोः मध्ये नीला गरीयसी। तस्मिन् नीलभूमियुक्तखण्डगे पर्यूषितं तायें तदा दमनकोपमंमिषं वर्णं तस्य भवत स्म। तत्प्रभावान्महीपाकः सम्पूर्णपृथ्वीं हि साधयेत्।[23]

तत्र महाराजभोजेनाचार्यशा›धरस्य मातुः दत्तः यथा अ›वज्र नाम खण्डगस्य।

एकास्थूलासिता रेखा –भूमिर्न्नीला दृढा यदि।
स्थूलाङ्गमङ्गवज्रं तद्विद्वाल्लक्ष्मीर्यशः प्रदामः।।
एतत् क्षते भवेक्ष्छाथः स्थूलश्चिरतरास्थितिः।
एवं महान्तमपरे वदन्ति खण्डग कोविराः।।[24]

अन्यञ्च –

घृष्टायां दृश्यते भूमौ अङ्गञ्च प्रतिबिम्बितम्।
अ›वज्रं भेवतस्य द्विधाभूमिः सितासिता।।[25]

कोहप्रदिपस्य मते कान्तकोहखण्डगः –

भिरङ्ग रुप्यपत्राभमीषन्मणिनिभञ्च यत्।
दुर्लभं तन्महामूल्यं कान्तलौहं प्रचक्षते।।[26]

तत्रैव कृष्णवज्रखण्डगस्य यथा –

कृष्णाभूमिर्भवेत् स्वच्छा पीता वज्रा›स›ता।
कृष्णवज्रमिति प्राहुस्तत्क्षते मोहु उच्यते।।[27]

प्रदीपाख्यग्रन्थे अहुकीवज्रकनाम खण्डगस्य वर्णनम् यथा –

कृष्णाभूमिं सुवर्णाभमीषच्छुला›स›तम्।
अहुलीववज्रकं विद्यात् काल संशमथापरै।।[28]

**आरुणाख्य खण्डगः** –

अरुणं सूक्ष्ममूर्खश्चेदङ्गं भूमिः सितेतरा।
अरुणाख्यमिदं वजं शत्रुहर्प–निसदनम्।।
सूर्याशुस्यर्शमात्रेण वन्हिरूपां वनेच्छिखाम्।
तस्य स्पर्शमात्रेण यद्यकोषः स्फुटेन्निशि।।[29]

सः खण्डगः मनुष्याणां कृते दुर्लभमस्ति। भाग्यवशात् कुत्रापि लभ्यते। तद्योजनसहस्रामि अरिष्टं नाशयति इति निश्चितम्।[30]

**श्वेता›स्य खण्डगः –**

श्वेतास्तिस्त्रो यदा रेखा आमूलादुपलक्ष्यते।
श्वेता›मिति तद्विद्यायश्लोलक्ष्मीबल प्रदम्।।[31]

**अम्भोजखण्डगः –**

अम्भोजदलसङ्काशं अङ्गं भूमिः सितेतरा।
अम्भोजवज्रं तज्ज्ञेयं कथितं मुनिपुङ्गवै।।[32]

**गडावज्राख्यखण्डगः –**

अङ्गं यस्य गक्षकारं भूमिश्चैव सितेतरा।
गङ्गावज्रमिदं ब्रूयात् तत्क्षते शूलसम्भवः।।[33]

**तिलवज्राख्य नाम खण्डगः –**

अङ्ग–कृष्णं–तिलाकारं भूमिश्चैव सिताऽसिता।
तिलवज्रमिदं ज्ञेयं लक्ष्मीवकायशः प्रदुम।।
तत्क्षतैः तिलतैकाभा वसा प्रच्यवतेऽधिकम्।।[34]

**अग्निवज्राख्यनाम खण्डगः –**

धूम्रवर्णा भवेद्मिरङ्गं वहिन–शिखोयमम्।
अग्निवज्रमिदं ज्ञेयं शत्रूणां दाहुकारकम्।।[35]

अस्मिन् खण्डगप्रहारेण शीतोदिकं न्यस्तं तदा क्षणातेव तप्तं भवति च स सूर्यकिरणस›मात् शाणे च वहिनं वभेदिता।[36] तेनाघातेन अत्यन्तबलवानः दाहः भवति स्म। अन्यञ्च दुग्धवत्क्षणो भवेत्। स खण्डगः परमभाग्येन धरणीतले लभ्यते।[37]

**कणावज्राख्यनाम खण्डगः –**

येन खण्डगप्रहारेण शरीरे अन्तर्दाह भवतीति। भूमिः श्वेता तिला अ›श्चेत् पिप्पली सहुशम् स एव कर्णावज्रमित्युक्तम्।[38]

**ग्रन्थिवज्राख्यनाम खण्डगः** –

यस्य खण्डगस्य भूमिः कृष्णा च यदैवाङ्गै ग्रन्थि यस्य अन्यञ्च शप्रुयक्षस्य कर्ता खण्डगेति ग्रन्थिवज्रम्।[39] यस्य प्रहारेण बलवान् दाहः तृषा, ज्वरश्च भवति। तस्य शालमणींदलाकारम›ं च कृष्णा–पुत्रिकासु।

**स्थिरावज्राख्यनाम खण्डगः –**

अस्य खण्डगस्य विद्याातेन कम्पनं भवति। यथा –
स्थिरावज्रमिदं प्राहुस्ततुश्रुते वेपथुर्भवेत्।[40]

**तित्तिरवज्रनाम खण्डगः –**

यस्य खण्डगस्य तित्तियक्षाभम› भूमिः च शुक्तेतरा भवतीति। एतत् वज्रं तित्तिरवज्रं भवति। [41]

**वनमालानामखण्डगः –**

वनमाला समा यस्मिन्न माला खण्डगे प्रदृश्यते।।
मालाङ्गमिति तद्विद्यात तत्तोयं गन्धवद्भवेत।
अत्र तप्तोदकं व्यस्तं शीतं भवति तत्क्षणम्।। [42]

एषः खण्डगः अन्यञ्च –

एषः दाहुः परीतानमृते पित्तदत्तात्मनाम्।
भवेत् परमभैषज्यद्वि लभ्यते।।[43]

**जीरकवज्राख्यखण्डगः –**

यदा जीरकसङ्काशमङ्गं भूमिः सितासिता।
एततज्जीरिकवज्रं स्यात् तत्क्षते तत्क्षणाज्जरः।।[44]

**भ्रमरवज्राख्यखण्डगः –**

भूमिः सितासितक्षेत्रा अ› भृङ्गाभूमिष्यति।
तत्र चेन्मध्वमं न्यसतं शेषमाप्नोति केवलम्।।
एतद् भ्रमरवज्रं स्यात् तत्क्षते स्याद्विसूचिका।।[45]

अपि च –

उद्ध्र्वगं कपिलामासम› यस्मिन् प्रतीक्षते उद्ध्र्ववज्रमिदं प्राहुर्विषवेगानिसदनम्।[46] अस्य खण्डगस्य वर्णनं कोऽप्रदिपेऽपि प्राप्नोति। यथा–

उद्ध्र्वगं कपिलाभासम› यस्मिन् प्रतीयते।
लाङ्गेकाङ्गन्तु तद्विद्यात् स्पर्शे तस्यादि नाशनम्।।[47]

**मरीचा›मिदं वज्रम् –**

मरीचसङ्काशं भवेद् भूमिः।
तत्क्षते कटुरक्तं भवेत्।
सितेतरा भूमिः स्याद्।[48]

अन्यञ्च –

भुजङ्गवज्राख्यखण्डगः तथा च अश्वा› वज्राख्यखण्डगः।[49]

एकस्यास्य प्रसादेन कृतस्नां शास्मि महीं नृपः।
यदाश्वखुरसङ्काशं खण्डगं भूमिस्तु निर्म्मका।।
अश्वाङ्गमिति तं विद्यात् खण्डगं परमदुर्लभम्।
तस्य संयोगेनमात्रेण वाजी मन्दोऽपि धावते।।[50]

अपि च –

तस्य क्षालनतोयेन हयानां रोगनाशनम्।
एतात्क्षते भृशं मूर्च्छा दाहश्च भ्रम एव च।।[51]

अन्यैरपि यथा –

1. वर्हाङ्गमितिखण्डगः।
2. अञ्जजाख्यखण्डगः।
3. क्षैद्राख्यखण्डगः।
4. मधुरनामखण्डगः।
5. क्षुदा›ख्यखण्डगः।

क्षुद्रवज्रकंनामानं प्राह नागार्ज्जुनो मुनिः।
इदं कुण्डकवज्रञ्च प्राहु लोहार्णवे मुनिः।।[52]

1. मक्षिकाहुनामखण्डगः।
2. तुषवज्राख्यखण्डगः।
3. यवाङ्गस्यखण्डगः।

ख›ं यवफलाकारे भूमिः कृष्करातिर तथा।
यवा›मिति तं विधात् तत्स्पर्शे कण्डुसम्भवाः।
एष खण्डगाधमस्त्याज्यो यदीच्छेद्भुमि मात्मनः।।[53]

1. व्रीहीज्राख्यखण्डगः।
2. अतसीवज्राख्यखण्डगः।
3. सर्षयाङ्गखण्डगः।
4. सिंहिवज्राख्यखण्डगः।
5. ताण्डुकाङ्गख्यखण्डगः।
6. गोवज्राङ्गखण्डगः।
7. शिराङ्गखण्डगः।

8. नरवज्राख्यखण्डगः।

9. ग्राह्याङ्गाख्यखण्डगः।

10. नेत्राङ्गरेण्यखण्डगः।

11. केशाङ्गोख्यखण्डगः।

12. उपलाङ्गाख्यखण्डगः।

13. दोणोवज्राख्यखण्डगः।

यथा पद्मपुराणे –

निरङ्गारिशिता धाराशाण वहिनं वमत्यापि।
द्रोणीवज्रमिदं ज्ञेयं पृथिव्यां नातिदुर्लभम्।।[54]

1. काका›ाख्यखण्डगः।
2. कयाका›ख्यखण्डगः।
3. यत्रवज्रकखण्डगः।
4. तुवरीवज्राख्यखण्डगः।
5. बीम्बीवज्राख्यखण्डगः।
6. फलवज्राख्यखण्डगः।
7. सर्षयवज्राख्यखण्डगः।
8. नीलीवज्राख्यखण्डगः।
9. वचावज्राख्यखण्डगः।

राज्ञः भोजेन एषः खण्डगवरो प्रयत्नतः साधनीयः इति कथितम् –

रसयोनादुत्तमं ह्यङ्गं भूमिस्तस्य दलोपमा।
रसोनवज्रं जानीयात् शाणे वहिनं वमत्यापि।
अस्य धावतोयेन आमवातविनाशनम्।।[55]

| | |
|---|---|
| शमुनाखण्डगः | जिङ्गवज्राख्यखण्डगः |
| शमीवज्प्रख्यखण्डगः | रोहितनामकखण्डगः |
| प्रोष्ठीनामकखण्डगः | मारिषाङ्गखण्डगः |
| तडितखण्डगः | मेघाङ्गख्यखण्डगः |
| खुराङ्गाख्यखण्डगः | तडितखण्डगः |

| | |
|---|---|
| मेघाङ्गाख्यखण्डगः | यर्वणाङ्गाख्यखण्डगः |
| गुञ्जावज्राख्यखण्डगः | शरवज्राख्यखण्डगः |
| दूर्वावज्राख्यखण्डगः | बिल्ववज्राख्यखण्डगः |
| मसूरा›खण्डगः | शोणा›ाख्यखण्डगः |
| शठीवज्राख्यखण्डगः | मार्जारा›खण्डगः |
| केतुकवज्रम् | वज्राङ्गाख्यखण्डगः |
| कलायवज्राख्यखण्डगः | चम्पकवज्राख्य,खण्डगः |
| वलावज्रम् | वटवज्रम् |
| वंशा›खण्डगः | शालाङ्गखण्डगः |
| ज्येष्ठीखण्डगः | जालववज्राख्यखण्डगः |
| पिपीलिका›खण्डगः | नलाङ्गखण्डगः |
| रजोवज्राख्यखण्डगः | कुष्माण्डखण्डगः |
| रोमाङ्गखण्डगः | सुधाङ्गख्यण्डगः |
| कर्कन्धुखण्डगः | कज्जिकावज्राख्यखण्डगः |
| महिषा›खण्डगः | स्वच्छाङ्गाख्यखण्डगः |
| वक्रखण्डगः | |

उपरिलिखितवज्राणां लक्षणं राज्ञाभोजेन [56] प्रोक्तम्। तत्सर्वं विस्तारभयेन कतिमयखण्डगानां नामानि अहंमत्र लिखितानि। कतिपयखण्डगानां लक्षणमपि दत्तं च इति।

**खण्डगस्य स्वरूपाणि (वर्णः) –**

नीलीककाय–कुसुमच्छविगृञ्जानाभा वा।
चन्द्रनीलमणि–काचमणि–प्रभा च।
भूमिश्च मरकत–प्रतिभावभासा
खण्डगस्य नीलमिति रुपमिदं वदन्ति।।[57]

अर्थात् –

नीलीकायस्य कुसुमेव छविः।
गृज्जनस्य आभा।
चन्द्रमा–नीलमणि–काचनमणित्रयानां प्रभा

यस्य भूमिश्च मरकतसम भासति यत् तद् तस्य खण्डगस्य रूपं नीलरूपमिति कथ्यते।

यस्मिन्नखएडगे बहून्यपि निन्दितानि अरिष्टानि दृश्यन्ते तथापि स खण्डगः अधिकगुणवन्तः इति।[58]

**कृष्णरूपम् –**

या कालकाम्बुदमसीरसकालसर्प–
शŠान्धकारकयभारसमा विभाति।
भूमिश्च या भ्रमरबन्धुसमावभासा
खण्डगस्य कृष्णमितिरूपमिदं वदन्ति।।[59]

अर्थात् – या भूमिः –कालकमेव मसी–रस, काल,सर्प, शंङ्का, अन्धकार, केशसमूहादिनांमिव स विभाति। भ्रमरबन्धुसमावभासा, तद् तस्य खएडगस्य रूपं कृष्णरूपमस्ति।

अत्र मुनिनागार्जुनस्य मतं दर्शरूति यथा –

साधारणमिदं रूपं प्राहु नागार्जनो मुनिः।[60]

**पि›रूपम् –**

या प्रावृषेण्य नवमेकसमानवार्णा –
गोमेदरत्नसदृशापि च यस्य भूमिः।
खण्डगस्य पि›मिति रूपमिदं वदन्ति।
भर्त्तुर्यशोबलमधनक्षय–कारणाय।।[61]

अर्थात् वर्षाकाले भवितमेकसमान नूतनस्य गोमेदरत्नेव यस्य भूमिः स्यात् स एव पि›रूपस्य खण्डगऽस्ति। स भर्तुः यशबलधननां क्षयकारकमस्ति।

**धूम्ररूपम् –**

या मन्दधूमसदृशा च शिरीषयुष्य –
तुल्या विभाति मालिनापि च खण्डगभूमिः।
नागार्जुनो वदति धूम्रमिदं हि रूपं
भर्त्तुर्यशोबलधनावलि वद्र्धानार्य।। [62]

अर्थात् यस्स खएडगस्य भूमिः मन्दधूमसदृशा च शिरीषपुष्पतुल्यामलिना विभाति। नागार्जुनेन कथितं यत् तत् धूम्ररूपमस्ति।

नीलकृष्णादिकं खडगे रूपमित्यभिधीयते।
तेनैव यत्प्रतीतं स्यात् तज्ज्ञाभिरिति गद्यते।।[63]

अर्थात् खण्डगे नीलकृष्णादिकं रूपं अभिधीयते। तेनैव यतप्रतीतिं स्यात् तजजातिरिति वर्ण्यते।

द्विरूपं मिश्रितं कृत्वा निर्मितखण्डगेन चेत् सङ्करखण्डगः।

त्रिभिरूपै समेत्नं तु खण्डगः – त्रिपुरःखण्डगः।

रूपैश्चतुर्भिः संयुक्तं कृत्वा निर्मित खण्डगः चेत् चतुरखण्डगः स खण्डगरूपेषु उत्तमखण्डगः।[64]

**वर्णानुसारेण खण्डगप्रकारः (जाति :)–**

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः।
जातिभेदो विनिदृष्टः खण्डगानां मुनिपुङ्गवैः।।[65]

खण्डगानां नीलकृष्णः पिष›श्च धूम्रश्चेति चतुर्विधा वर्णप्रकारः कथितः।[66]

| | |
|---|---|
| 1 ब्राह्मणखण्डगः | नीलवर्णस्य |
| 2. क्षत्रियखण्डगः | कृष्णवर्णस्य |
| 3. वैश्यखण्डगः | पीतवर्णस्य |
| 4. शूद्रखण्डगः | धूम्रवर्णस्य |

**ब्राह्मणखडगः** –

शूद्राः शुद्धवर्णश्च सुनेत्रः सुखनश्च च।
मृदुस्पर्शः सुसन्धेयस्तीक्ष्णधारो महागुणः।।
खण्डगं ब्राह्मणजातिं तं प्राह नागार्जुनो मुनिः।[67]

अस्य खण्डगस्य प्रहारेण यथा –

अस्य क्षते भवेच्छोथो घोरः सर्व्वाङ्गगोचरः।
मूर्च्छापिपासा दाहश्चज्वरो मृत्युश्च जायते।।[68]

अर्थात् शुद्धा›ः, शुद्धवर्णः, सुनेत्रः, सुस्वरः, मृदुस्पर्शः, सुसन्धिः। तीक्ष्णधारः चादिनां गुणानां युक्तः खण्डगः महागुणेति उच्यते। एवं नागार्जनेन मुनिना ब्राह्मणःखण्डगः इति कथितः।[69]

अस्य खण्डगस्य क्षते घोरःशोथः सर्वा›गोचरः भवेत्। मुर्च्छा–पिपासा– दाहश्च ज्वरो मृत्युश्च जायते। [70]

**ब्राह्मणखण्डगस्य लक्षणम् –**

अधृष्टं त्रियाकाकंङ्गकम् अर्धरात्रिन्दिवोषितं तथापि मलिनत्वं न सन्धते। परं तु निर्मलं कुरूते।[71]

**तरुणादित्यकरण –**

स्पर्शादेव तृणे स्थितः खण्डगः सर्वं दहेत् किन्तु धारिणः पुरुषस्य करं न तु दहति। गायत्रीमन्त्रोच्चारणमात्रेण खरतां व्रजति स्फुटम्।[72]

एषः खण्डगवरः सर्वमिरिष्टं नाशयेद्ध्रुवम्।
अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत।।[73]

ब्राह्मणखण्डगः मनुष्याणां कृते दुर्लभोऽस्ति यथा –

तस्मादेव मनुष्याणं सुलभे नेहि भूतले।
दृश्यन्ते प्रायशः स्वर्गे कुशद्वीपे हिमालये।।[74]

**क्षत्रियजातीयखण्डगः –**

धूम्रवर्णं महासारं तीक्ष्णधारं खरचरम्।
सर्वाघातसहं सर्व्वनेत्रवर्णस्वराकरम्।।
खण्डगं क्षत्रियंजातिं तं जानीयत् खण्डगकोविदः।।[75]

अर्थात् धूम्रवर्णः सारमपन्न तीक्ष्णधार–तीख्तस्वर सर्वाधातसह–सर्वप्रकारस्व नेत्राणि –स्वरस्यात्रागीररूपादिकां लक्षणानां युक्ताखण्डगः क्षत्रियखण्डगः कथितम्।

अस्य खण्डगप्रहारेण दाहुः –तृषा–तृण–ज्वर–भ्रमश्च मृत्यु भेवेदिति। शाणे बहूनबहिनकणान वमनं करोति। सस्कारे वासंस्कारेऽपि नैर्मल्यं तस्याङ्गे लक्ष्यते।[76]

शाणेऽप्यशाणे स्वरतां मूर्ध्नि चात्यन्तीक्ष्णता।
रक्तस्पर्शमात्रेण विशेदन्तरमन्तरम्।।
च अयं खण्डगकरः पूज्यो मनुष्यैरपि लभ्यते।[77]

**वैश्यजातिरियं खण्डगः –**

नीलवर्णः कृष्णवर्णः संस्कारे निर्मलो भवेत्।
शाणेन खरता चास्य घाततुल्यं निकृन्तति।। [78]
वैश्यजातिरयं खण्डगः क्षते त्वडमात्रदर्शनम्।
नात्युत्कृष्टो नातिहीनः सर्वत्रैवोपलभ्यते।।[79]

अर्थात् एषः खण्डगः नीलवर्णः वा कृष्णवर्णः संस्कारे भवेच्चास्य खण्डगस्य तीक्ष्णता खरता धानतुल्यं निकृन्तीति। खण्डगाधाते त्व›मात्रदर्शनं भवति। एषः खण्डगो नात्युकृष्टो नातिहीनः च सर्वत्रैवोपलभ्यते।[80]

**क्षुद्रजातीयखण्डगः –**

सजकाम्भोदसङ्कशः स्थूलधारो –मृदुस्वरः।
संस्कारे चैव मलिनः शाणे चापि स्वतेतरः।।[81]

शूद्र जातिरियं खण्डगः क्षते नाल्यापि वेदना।
दूराद् एषोऽधमः त्याज्यो यद् –इच्छेत् हितात्मनः।।[82]

प्रायशः सर्वलोकेषु स्वयमेव उपदृश्यते। अन्तोत्गत्वा – त्रयाणां लक्षणेन युक्तखण्डगः त्रिजातिखण्डगः भवति।

चतुर्णां लक्षणेन युक्तखण्डगः जातिसङ्करमुच्यते।[83]

**अथ त्रिंशतन्नेत्राणि –**

अ›ातिरिक्तं यज्जातिस्तन्माहात्म्योपसूचकम्।
तन्नेत्रमिति जानीयत् खण्डगे खण्डगयिशारदाः।।[84]
चक्रं–पदमं तथा खण्डगो डमरू–धनुः–अङ्कुशः।
छत्रं पताका–वीणा च मत्स्य–लिं›–ध्वजा–इन्दवः।।
कुम्भः शूकश्च शार्दूलः सिंहः सिंहासनः गजः।
हंसो मयूरः जिहवा च दशनः खण्डगः एव च।।
पुत्रिका–चामरः–शैलः–पुष्पमाला–भुजङ्गम्।
त्रिंशदेतानि नेत्राणि खण्डगानां कथितानि वै।।[85]

भोजानुसारेण खण्डगे अङ्क सर्वतः स्यात् किन्तु नेत्रमेकत्रसंस्थितम्।[86]

नेत्रस्य महत्वं एषः श्लोके दर्शितं यथा –

खण्डगः सडङ्गो न च नेत्रहीनो न पूज्यते नाम्बुकरः स एव।
यथा मनुष्यः खलु सुन्दरा›ो न कर्मयोज्यो मुपि नेत्रहीनः।।[87]

खण्डगे यस्य यस्याकृति दृश्यते तस्याकृति आधारेण खण्डगस्य नामाभिधानं वा परीक्षा भवति। यथा –

चक्राकारं यदा नेत्रं खण्डगस्याङ्गे प्रदृश्यते ते चक्रनेत्रं जानीयत्।[88]

यदि वा दृश्यते खण्डगे यदानेत्रे तर्हि स खण्डगे पद्मनेत्रखण्डगः।[89]

उर्ध्व स्थला यदा रेखा गदाकारा प्रतीयते तदा तत् गदानेत्रमिदं विद्धि।[90]

शङ्खाकारं यदा नेत्रं खण्डगमध्येऽपि दृश्यते तत्शङ्खनेत्रमिदं प्रोक्तम्।[91]

डमरूप्रीतमं नेत्रं यस्य भूमौ प्रतीयते तं सर्वार्थसाधकं खण्डगः।[92]

एवं खण्डगस्य अ› स्थिताकृत्यानुसारेण वा तत्र नेत्रस्याकृत्यानुसारेण खण्डगप्रकाराः निर्धारितव्यम् इति। अन्यच्च धुनः नेत्रम्–अङ्कशनेत्रम् –पताकानेत्रम्–छत्रनेत्रम्–नेत्रवीणानेत्रमित्यादिकमस्ति।[93]

तेन आकृत्यााधारेण खण्डगस्य शुभाशुवसरेऽपि निर्णयं भवति। धाराधीयेन नेत्रणां प्रकारद्वयम्। यथा

सवर्णमसवर्णञ्च तत् सर्व्वं भवेत्।
सवर्णं शान्तिसम्यत्यै रिपुनाशे तथा परम्।।[94]

अर्थात् सवर्णः असवर्णता नेत्राणां द्वयो भेदः वर्तते। तत्र सवर्ण–एकलोकस्य सुखं प्रदास्यति।

असवर्णः नेत्रं ददाति। द्वयोः द्विविधं भेदः यथा –

मूकं–मध्य–अग्र–संस्थानात् तत् पुनर्द्विविधं भवेत्।
अग्रे चाग्रयफलं रोयं मध्ये मध्यफलं मतं भोजने दर्शितम्।।[95]

अत्र मुनेः नागार्जुनस्य मतं भोजेन दर्शितं यथा –

मूले फलं जघन्यं स्यात् प्राहनागार्जुनो मुनिः।
एकं हि त्रीणि नेत्राणि मात्र संख्याव्यतिक्रम्।।[96]

अथ नेत्रस्य संख्यानुसारेण फलप्राप्ति।

एकनेत्रम् –एकं धर्म्मः।
द्वे नेत्रे – स्वर्गकामो द्वे।
त्रीणिनेत्राणि – त्रीणि च त्रिर्णकम्।

तत्फलानि प्रयच्छन्ति प्राह नागार्जुनो मुनिः।[97]

द्वि नेत्रमिति जानीयत् स्वरसंज्ञा नेत्रयोद्वयोः।
त्रिनेत्रश्च त्रिभिज्ञेयं बहुनेत्रमतः परम्।।[98]

अत्र शुभदायिनीं नेत्राणां दिङ्गमात्रामिति निर्दिष्टम् यथोत्तरं खण्डगं गुणावहुमनुत्तमं आह। च तीव्राणां अ›ानाच्च दर्शनञ्च शुभावहमिति।[99]

**अथ खण्डगेऽरिष्टलक्षणानि –**

अत्र नेत्रस्य संस्थान तथारिष्टापि लक्षणानि।
नेत्रेषु स्थाननियमो न अरिष्टे स्थान–निर्णयः।।[100]

कथितं यत् –प्रशस्ताङ्गोऽपि यः खण्डगोऽरिष्टनैकेन निन्दितः। [101]

अ›ातिरिक्तं खण्डगादियच्छुद्रत्वायसूचकम्।
तदरिष्टमिति प्राहुर्भूमिरङ्गादि –धारधम्।।[102]

तत्भूमिञ्च–तताङ्गादीनां नेत्रसदृशं अरिष्टसंस्कारायऽपि त्रिंशत् यथा–

छिद्र –काकपदं–रेखां–भेको–मूषिक एव च।
पिडालः शर्करा–नीली–मशको–भृङ्गसूचके।।
त्रिबिन्दुः–कलिका–चावी–कपोतः–काकः एव च।[103]

खर्परः शकली–क्रोडो–कुशयुगल जालिके।।
कराक–कङ्कः–खर्जूर–श्रृङ्गपुच्छ–खनित्रक्।
लाङ्गुलं–सूर्यं–खडिशो मुनिना तत्वेश्निा।।
भोक्तान्येतान्यारिष्टाानि खण्डगानां त्रिंशदेव हि।।[104]

| क्रम | अरिष्टम् | आकारः | फलम् |
|---|---|---|---|
| 1 | छिद्रम् | छिद्राकारः | भर्तुवीर्यबलपदम् |
| 2 | काकपदम् | काकपदाकारः | सर्वाभिष्ट विनाशवः |
| 3 | रेखा | रेखाकारः | भर्तुवीयबलापदम् |
| 4 | भिन्नम् | —— | भ्रान्तिकरम् भर्तुः फलं यशो राष्ट्रं ना दत्वा न व्रजेत् स्वयम्।। |
| 5 | भेकः | मेढलस्य शिराकारः | स›मे भयदायकम् |
| 6 | मूषिका ना मूषिका | मूषिकाकारः | भर्तुः कुर्यात् मृत्युः पातालसङ्गमम् |
| 7 | विडालः | बिडालनासकारः | भर्तु सर्वार्थनाशनम् |
| 8 | शर्करा | शर्कराकारः | भर्तुः धनबुद्धि विनाशनम् |
| 9 | नीली | नीलीरसाभासः | यशो–लक्ष्मी विनाशनम् |
| 10 | मशकः | मशलाकारः | भर्तुः–कुलं–यशो बुद्धिं धृतिः प्रीतिञ्च नाशयेत् |
| 11 | श्रृ›ः | बिन्दु आकारः | धृतिस्मृति विनाशनम् |
| 12 | सूची | सूचीरूपम् उर्ध्वं वा तिर्यगेव | भर्तुः कुलविनाशनम् |
| 13 | त्रिविन्दुः | त्रयः बिन्दवः पंक्तयोः विषमेण वा उपर्युपरि वा अधोऽधः | स्पर्शमात्रेण स चैलं स्नानामचरेत् |

| | | | |
|---|---|---|---|
| **14** | कलिका | —— | धी—धृतिः—स्मृतिनाशनम् |
| **15** | दारी | —— | सर्व्वाभिष्ट विनाशनम् |
| **16** | कपोतः | कपोतपक्षप्रतिमम् | भर्तुः कुलं यशोविद्यां बलं बुद्धिश्च नाशयेत् |
| **17** | काकः | काकाकृतिः | सड़ग्रामेमे भर्तुः भङ्ग एवोपजायते |
| **18** | खर्परः | खर्पराकारः | भर्तुः यशोबलं वीर्यं बृद्धिं प्रीतिं च नाशयेत् |
| **19** | शकली | लोकेशबलं लग्नं स्यात् | सर्वाभिष्ट—निसूदनम् |
| **20** | क्रोडी | —— | —— |
| | कुशायत्र | क्रोडीकुशपत्रकयोर्लक्षणे पतिते ।[105] | |
| **21** | जालः वा जालिकः | यस्मिन् निम्नमिवाभाति | भर्तुः कुलधनापहम् |
| **22** | करालम् | एकैकरेखा दीर्घाग्रा यदा पल्लविनी भवेत् | दर्शनादेव |
| **23** | कङ्कः | कङ्कयत्राकरम् | स्पर्शनमात्रेण नश्यति आययशोबलम् |
| **24** | खर्जूरः | खर्जूरवृक्षाकारकम् | भर्तुः नश्यन्ति लक्ष्मीबलकुलादयः |
| **25** | श्रृङ्गः | गोश्रृंगकारकम् | अनेन भर्तुकुलधनापहम् |
| **26** | पुच्छः | गोपुच्छाकारम् | भर्तुः सर्वाथनाशनम् |
| **27** | खनित्रकः वा खनित्रः | खनित्राकारम् | शूराणामपि सग्रामे भङ्गमेतत् |
| **28** | ला›लम् | लाङ्गलाकरम् | अयमायुः श्रियं हन्ति विद्यां बलमशेषतः |

| | | | |
|---|---|---|---|
| **29** | शूर्पः[106] | —— | —— |
| **30** | वडिशः | वाडिशारिष्टस्य लक्षणं पतितम्[107] | —— |

एवं धाराधीपेन भोजेन ——

इत्यारिष्टानि प्रोक्तानि नानातन्त्रात् प्रयत्नतः।
विचार्यैतानि मतिमान् खडगं कोरो निधापयेत्।।[108]

दिङ्मात्रमिदमुदिष्टमरिष्टानां हितात्मनम्।
अम›लानां मन्दानां दर्शनात् —अशुभावहनम्।।[109]

अरिष्टमेकमेव स्यात् अशुभमस्ति, किन्तु द्विरिष्टं शुभावहमस्ति। अन्यान्यमशुभं हव्याद्विषस्य हि विषं।[110] यथा —

एकमारभ्य सप्तात्मरिष्टं प्राहु नान्यथा।
यथोत्तरं द्वि गुणितं फलमाहुर्मनीषिणः।।[111]

**भूमिलक्षणम् —**

भूमिश्च द्विविधा ज्ञेया —[112]

दिव्य —भौमविभागेन भूमिः या द्विविधा मता दिव्या च स्वर्गे समुद्भूता भौमा च पृथिव्यां समुद्भवा इति।[113]

बृहद्धारीतग्रन्थाानुसारेण —पूर्वं महेशेन यानि विषयाणि भुक्तानि तेषां पतितास्तु बिन्दवः स—स एव देशः कालायसामाकरतां जगाम्। [114] अन्यञ्च पुरा क्षीरसमुद्रमध्यादुत्याद्यामृतं संगृह्य देवा—सुरेन्द्राः ययुः तद्विन्दवो यत्र नियेतुः एष शुद्वायसमाकरतां जगाम्।[115]

अत्र खण्डगस्य द्विविधभेदः भवति। यथा —

विषयोत्थकालायासेन निर्मित खण्डगः तस्य लक्षणानि यथा —

भृशं कालाः खरा›ः सम्भवन्ति। मूर्च्छा, ज्वलनः (दाहः), ज्वरः, अनाहः, शोकः, हिक्का, वमन (करा।)

अमृतोत्थ—शुद्धाचासेन निर्मितखण्डगः[116] तस्य लक्षणानि यथा —

कुर्वुरा›ाः मन्दा›ाः सम्भवन्ति च। बली, पलितता, मलिनता, ज्वरः, व्याधिः विनाशन्तः।[117]

यत्रैव पतितास्तुं बिन्दवः तत्तदाकरतां गताः। यथा —

वराणसीमगधसिहंल—भूमिभागे, नेपालभूमिषु, अङ्गमहीप्रदेशे, सौराष्ट्रिके, अन्यतर धन्यमहीप्रदेशे।[118]

प्रदेशानुसारेण खडगस्य लक्षणानि —

**वाराणसेया –**

1. सुस्निग्धाः।
2. तीक्ष्णधाराः।
3. सदङ्गिः
4. लघवेः।
5. सुखसन्धेयाः।
6. अभेद्यशालिनः।[119]

**मागधा –**

1. कर्लशा।
2. स्थूलधाराः
3. गूढतरङ्गिणा।
4. दुःखसन्धेयाः खडगाः।[120]

**नेपालप्रदेशे प्रभवा खडगः –**

1. निरङ्गाः।
2. निश्चलाः।
3. सदङ्गाः।
4. लघवः।
5. स्थूलधारिणः।[121]

**कलि›देशोत्थखडगाः –**

1. गुरवः।
2. स्वच्छाः।
3. व्यक्ताङ्गाः।
4. तन्तुहेतवः।[122]

**सौराष्ट्रेत्व खडगाः –**

1. निर्मलाः।
2. स्निगधाः।
3. सुव्यक्ताङ्गाः।
4. भृशखराः।[123]

सिंहकद्वीपजातानां चतुर्द्धा भेदः उच्यते।[124]

1. केचित् सदङ्ग गुरवः कर्कशा।
2. केचित् सदङ्गः।

3. गुरवः

4. कर्कशा।

5. स्निग्धधारिणः।

केचित सद›ाः, लघवः, सुस्निग्धा तथा च स्थूलधारिणः।[125]

एषां सर्वेषां रूपेण मिश्रेण ज्ञेया हि द्विजातयः।[126] लोहजातिषु उत्तरोतरावरोत्तमादिनिर्मितखडगानां वर्णनम्।

1. सामान्याद् द्विगुणः ओड्रम्।
2. ओड्रत् दशगुणः कलिः।
3. कलेः शतगुणः भद्रम्।
4. भद्राद सहस्रगुणाः वज्रम्।
5. वज्रात् षष्टिगुणः पाण्डिः।
6. पाण्डितः दशगुणः निरविः।
7. निरवे कोटिसहस्रेणः अयस्कान्तोत्तमम् प्रशस्यते।[127]

इत्यादिकं रसायनोपयोगिकमेव न तु खण्डगे दृष्टफलम् असां तु लोहजातिनां वज्रं खण्डगाय युज्यते।[128] भौमखण्डगस्य कृते नृपस्य भोजस्य धारणा ईदृशी वर्तते यथा –

ये खडगास्तीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुमेधा।
केचित् सा›ाः निरङ्गाः कतिचन् समला निर्मलाः केचिदेव।
ते भौमाः कुर्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा वा
ते दुःखं स्तोकमुग्रं दधति बलकुलश्रीयशोनाशनास्ते।।[129]

खण्डगे ध्वनि–लक्षणानि –

ध्वनिरष्टविधः प्रोज्यते यः पूर्वं सूत्रसंग्रहे।
तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम्।।[130]

ध्वनि इत्युक्ते –

यः खडगे वायते शब्दो नख–दण्डादिनाहते।
स ध्वनिस्तुलनां मानं ज्ञानमष्टविधन्त्विन्त्विदम्।।[131]

ध्वनि अष्टधा सन्ति। यथा –

1. हंसः।
2. कास्य।
3. मेघः।
4. ढक्का। –पूर्वस्य चत्वारः शुभदा।

5. काकः।

6. तन्विका।

7. गर्दभः।

8. प्रस्तरः। – परे चत्वारः निदा स्पदास्तथा।[132]

एवं विचार्य खडगमानस्य कर्तव्यं खण्डगकोविदैः।[133]

# सन्दर्भ–सूची


**1.** युक्तिकल्पतरु – 11/28–29

**2.** युक्तिकल्पतरु – 11/30

**3.** खड्गादिकन्तुं निर्म्माय मायिकं दुहुनादिकं –युक्ति–11/30

**4.** युक्तिकल्पतरु – 11 / 28–29

**5.** दहनोऽथ जलं काष्ठं लोष्ठं शब्दद्वयस्तथा।
तप्ततैलादिकश्चैव मायिकस्यास्त्रमुच्यते।। – युक्ति.–11/31

**6.** युक्तिकल्पतरु – 11/35

**7.** सछिद्रतातिगुरुता तनुता सुखभेद्यता।। – 35
कवचनां विनिदृष्टः समासादोषसंग्रहः।।
अत्र वर्णो विनिदृष्टः क्रमोदवं चतुर्विधम्।।
–युक्तिकल्पतरु–11/35–36

**8.** सितो रक्तस्तथा चीतः कृष्णो ब्रह्मादिषु क्रमात्।
केचित कुर्वन्ति कुशलः कवचं धातु सम्भवम्।

**9.** कनकं रजतं ताम्रं लौहस्तेषु यथाक्रमम्।
युक्तिकल्पतरु –11/37

**10.** युक्तिकल्पतरु – 11/38

**11.** प×चधानिर्गुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमः।
अन्त्वावकृत्रिमौ ज्ञेयो तावैव सहजावितिः।। –युक्ति. –11/44

**12.** शतम›ाानि चत्वारिरूपणि जातयस्तथा ।
त्रिंशनेत्राणि जानियादारिष्टाानि तथैव च।।
भूमिश्श्च द्विविध ज्ञेया ध्वनिरिष्टविधो मतः।
मानन्तु द्विविधं प्रोक्तंमित्यैषां संग्रहोः मतः।।
युक्तिकल्पतरु – 11/45–46

**13.** युक्तिकल्पतरु –11/36

**14.** युक्तिकल्पतरु –11/47–50

**15.** युक्तिकल्पतरु –11/67

**16.** रौप्यप्रसमा भूमिरङ्गं श्वेतं प्रतीयते।

उर्ध्वं तत्तु महामूल्यं रूप्यवज्रमुशन्ति तम्। –11/67

**17.** एषः श्रेष्ठः खण्डगवरो उद्यात्लक्ष्मीयुर्यशोचबलम्।
स्वणरेखावली तन्वी यद्भूमौ निकपोपमा।। युक्ति – 11/64

**18.** गजशुण्डाकृतिभूर्मौ कृष्णायाम›सम्भवः।

**19.** गजवज्रामिति प्राहुः रक्तस्पर्शौ तु तद्विशेत।।

**20.** वरादिव्षधिगमनं तस्य प्रक्षालवाम्भसा। युक्ति– 11/66

**21.** अपि क्षीणोऽपि भूपालकस्तद्वीर्यात् साधयेन्महीम्।। 12/67

**22.** एरण्डबीजप्रतीमम› भूमिः सितेतरा।
रूपवज्रमिदं नामना शत्रुदर्पः क्षयङ्करः।।
एतस्य स्पर्शमात्रेण नरः सम्यग्मिुच्यते।।। युक्ति –11/67–68

**23.** युक्तिकल्प – 11/67

**24.** अ›दमदन यत्रा›ं खण्डगे यस्मिन् प्रतीयते।
नीला शुभ्रा भवेद्भक्तिस्तत्रनीला गरीयसी।
तस्मिन् पर्युषितं तोयं ग्रनथे दमनकापम्।।
तत्प्रभावान्महीपालः कृत्स्नां पृथ्वीं हि साधनम्।।
युक्ति–11/69–70

**25.** युक्तिकल्पतरु – 11/72–73

**26.** युक्तिकल्पतरु – 11/74

**27.** युक्तिकल्पतरु – 11/75

**28.** युक्तिकल्पतरु – 11/76

**29.** युक्तिकल्पतरु – 11/77

**30.** युक्तिकल्पतरु – 11/78–79

**31.** युक्तिकल्पतरु – 11/81

**32.** युक्तिकल्पतरु – 11/82

**33.** युक्तिकल्पतरु – 11/83

**34.** युक्तिकल्पतरु – 11/84

**35.** युक्तिकल्पतरु – 2/86

**36.** युक्तिकल्पतरु – 2/87

**37.** युक्तिकल्पतरु – 2/88

**38.** युक्तिकल्पतरु – 2/89
**39.** युक्तिकल्पतरु – 2/86
**40.** युक्तिकल्पतरु – 2/62–63
**41.** युक्तिकल्पतरु – 2/93–94
**42.** युक्तिकल्पतरु – 2/95
**43.** युक्तिकल्पतरु – 2/96
**44.** युक्तिकल्पतरु – 2/97
**45.** युक्तिकल्पतरु – 2/97
**46.** युक्तिकल्पतरु – 2/98
**47.** युक्तिकल्पतरु – 2/99
**48.** युक्तिकल्पतरु – 2/100
**49.** युक्तिकल्पतरु – 2/2
**50.** युक्तिकल्पतरु – 2/3
**51.** युक्तिकल्पतरु – 2/4
**52.** युक्तिकल्पतरु – 2/13
**53.** युक्तिकल्पतरु – 2/16–17
**54.** युक्तिकल्पतरु – 2/34
**55.** युक्तिकल्पतरु – 2/50–51
**56.** युक्तिकल्पतरु – 2/8
**57.** युक्तिकल्पतरु – 3/11
**58.** युक्तिकल्पतरु – 2/13
**59.** युक्तिकल्पतरु – 2/12
**60.** युक्तिकल्पतरु – 2/14
**61.** युक्तिकल्पतरु – 2/15
**62.** युक्तिकल्पतरु – 2/16
**63.** युक्तिकल्पतरु – 2/17
**64.** युक्तिकल्पतरु – 2/40
**65.** युक्तिकल्पतरु – 2/19
**66.** युक्तिकल्पतरु – 2/51

**67.** युक्तिकल्पतरु – 2/20

**68.** युक्तिकल्पतरु – 2/27

**69.** युक्तिकल्पतरु – 2/20

**70.** युक्तिकल्पतरु – 2/20–21

**71.** युक्तिकल्पतरु – 2/22

**72.** युक्तिकल्पतरु – 2/23

**73.** युक्तिकल्पतरु – 2/24

**74.** युक्तिकल्पतरु – 2/25

**75.** युक्तिकल्पतरु – 2/26–27

**76.** युक्तिकल्पतरु – 2/28

**77.** युक्तिकल्पतरु – 2/29

**78.** युक्तिकल्पतरु – 2/31

**79.** युक्तिकल्पतरु – 2/31

**80.** युक्तिकल्पतरु – 2/31

**81.** युक्तिकल्पतरु – 2/33

**82.** युक्तिकल्पतरु – 2/34

**83.** युक्तिकल्पतरु – 2/36

**84.** युक्तिकल्पतरु –अथास्त्रयुक्ति– 2/42

**85.** युक्तिकल्पतरु – अथास्त्रयुक्ति– 2/53–55

**86.** युक्तिकल्पतरु – नेत्रवर्णने – 2/37

**87.** युक्तिकल्पतरु – नेत्रवर्णने – 2/39

**88.** युक्तिकल्पतरु – नेत्रवर्णने – 2/43

**89.** युक्तिकल्पतरु – नेत्रवर्णने – 2/44

**90.** युक्तिकल्पतरु – नेत्रवर्णने – 2/46

**91.** युक्तिकल्पतरु – नेत्रवर्णने – 2/47

**92.** युक्तिकल्पतरु – नेत्रवर्णने – 2/48

**93.** युक्तिकल्पतरु – नेत्रवर्णने – 2/49–52–73

**94.** युक्तिकल्पतरु – नेत्रवर्णने – 2/74

**95.** युक्तिकल्पतरु – नेत्रवर्णने – 2/76

**96.** युक्तिकल्पतरु – नेत्रवर्णने – 2/77
**97.** युक्तिकल्पतरु – नेत्रवर्णने – 2/78
**98.** युक्तिकल्पतरु – नेत्रवर्णने – 2/79
**99.** युक्तिकल्पतरु – नेत्रवर्णने – 2/80
**100.** युक्तिकल्पतरु – अरिष्टलक्षणे – 81
**101.** युक्तिकल्पतरु – अरिष्टलक्षणे – 82
**102.** युक्तिकल्पतरु – अरिष्टलक्षणे – 41
**103.** युक्तिकल्पतरु – अरिष्टलक्षणे – 45
**104.** युक्तिकल्पतरु – अरिष्टलक्षणे – 82 – 84, 56–59
**105.** युक्तिकल्पतरु – अरिष्टलक्षणे – 3
**106.** युक्तिकल्पतरु – अरिष्टलक्षणे – 85–100, 1–12
**107.** युक्तिकल्पतरु – अरिष्टलक्षणे – 12
**108.** युक्तिकल्पतरु – अरिष्टलक्षणे – 13
**109.** युक्तिकल्पतरु – अरिष्टलक्षणे – 14
**110.** युक्तिकल्पतरु – अरिष्टलक्षणे – 15
**111.** युक्तिकल्पतरु – अरिष्टलक्षणे – 16
**112.** युक्तिकल्पतरु – अरिष्टलक्षणे – 46
**113.** युक्तिकल्पतरु – अरिष्टलक्षणे – 17
**114.** युक्तिकल्पतरु – अरिष्टलक्षणे – 20–21
**115.** ये विषोत्था भृशं कालाः खरा›ः सम्भवन्ति हि।
मूर्च्छादाहज्वरानाहु शोकहिक्कावमीकराः।। युक्ति–भूमि–21
**116.** येऽमृतोत्था कुर्व्वरा›ाः मन्दारान्द्रा सम्भवन्ति च।
वलीपक्तिमालिन्यज्वरा व्याधिविनाशनाः। यु.भूमि.–22
**117.** युक्तिकल्पतरु – भूमिलक्षणे – 24
**118.** युक्तिकल्पतरु – भूमिलक्षणे – 25
**119.** युक्तिकल्पतरु – भूमिलक्षणे – 26
**120.** युक्तिकल्पतरु – भूमिलक्षणे – 27
**121.** युक्तिकल्पतरु – भूमिलक्षणे – 28
**122.** युक्तिकल्पतरु – भूमिलक्षणे – 29

**123.** युक्तिकल्पतरु – भूमिलक्षणे – 30
**124.** युक्तिकल्पतरु – भूमिलक्षणे – 72–73
**125.** युक्तिकल्पतरु – भूमिलक्षणे – 32
**126.** युक्तिकल्पतरु – भूमिलक्षणे –
**127.** युक्तिकल्पतरु – भूमिलक्षणे –
**128.** युक्तिकल्पतरु – भूमिलक्षणे –
**129.** युक्तिकल्पतरु – भूमिलक्षणे –
**130.** युक्तिकल्पतरु – भूमिलक्षणे –
**131.** युक्तिकल्पतरु – भूमिलक्षणे –
**132.** युक्तिकल्पतरु – भूमिलक्षणे –
**133.** युक्तिकल्पतरु – भूमिलक्षणे –

# 2.धनुर्वेदसंहितायां प्रतिपादितलक्षणानां समीक्षा

अस्य महर्षेः वसिष्ठस्य ग्रन्थस्य विषयः धनुर्वेदोऽस्ति। ग्रन्थेऽस्मिन् अस्त्राणां युद्धस्य विषये क्रमबद्धवर्णनं प्राप्यते। ग्रन्थे विषयप्रर्वतनं सरलया रीत्याऽन्यप्राचीनग्रन्थवदस्ति। नाऽयन् प्रश्नोत्तररूपो ग्रन्थः एकदा विजिगिषु राजर्षि विश्वमित्रो गुरुवशिष्ठमभ्युपेत्य प्रणम्य उवाच। भगवन् धनुविद्यां दृढ़चेतस्ते शिष्याय हृदयं। महर्षिप्रवरो वशिष्ठस्तमुवाच। श्रृणु भो राजन् विश्वामित्रः! पुरा भगवान् सदाशिवः यां सर्वरहस्यां धनुर्विद्यां परशुरामायोवाच तामेव यथातत्थ्येनाहुं संप्रक्ष्यामि। त्वम् श्रृणु! प्रारभ्यो त्वम् श्रृणु । इतः प्रवस्तावनान्तरं मूलविषयस्य शारोपरिपायनम् स्थानानि धनुर्मुष्टि धनुर्व्यावोः व्यूहानि भवति। मूलविषये युद्धानि–चापानि–गुणलक्षणानि –शरलक्षणनि–फललक्षणं अस्त्रशस्त्रादीनि विविधानि विषयानि प्रदर्शितानि। तेषां विषयानां प्रतिपादितलक्षणानां यथा –

**चतुष्ट्यपादात्मको धनुर्वेद : –**

महर्षिणा वशिष्ठेन धनुर्वेदः चतुःपादात्मकं इति कथितम्। यथा चतुर्थानि पादानि –

1. प्रथमे पपादे –दीक्षाप्रकारः।
2. द्वितीये पादे –संग्रहः अस्त्रशस्त्राणामभ्यासे आवश्यकवस्तूनि।
3. तृतीयेपादे – सिद्धप्रयोगः।
4. चतुर्थेपादे – प्रयोगविषयाः[1]

महाभारते आदिपर्वे धनुवेर्दस्य चत्वारपादस्योल्लेखः कृतम्। यथा –

चतुष्पादं दशविधं धनुर्वेदमरिंदमः।
अर्जुना वेद वेदज्ञः सकलं दिव्यमानुषम्।।[2]

तत्र चतुष्टयपादात्मको धनुर्वेदः यस्य प्रथमे पादे दोषप्रकारे द्वितीये संग्रहः, तृतीये सिद्धप्रयोगः। चतुर्थे प्रयोगविधयः।

अग्निपुराणे यथा भगवताग्निदेवेन महर्षिवशिष्ठमुपदेशितं यथा – अहं चतुर्थपादात्मक धनुर्वेदस्य वर्णनं करोमि। धनुर्वेदस्य प×चप्रकाराः सन्ति। रथजाश्वपत्तीनां योद्वानामाश्रित्यास्य धनुर्वेदस्य वर्णनं प्राप्यते।[3]

धनुवर्देस्य प्रकाराग्निपुराणे यथा –

यन्त्रमुक्तंयागाग्निमुक्तं मुक्तसन्धारितं तथा।

अमुक्तं बाहुयुद्धञ्च पञ्चधा तत् प्रकीर्ततम्।।[4]

आचार्य नीलकण्ठेन स्वस्य महाभारतटीकायां इमान् धनुर्वेदप्रकारान् धनुर्वेदस्य चतुष्पादरूपेण वर्णितं यथा –

मन्त्रमुक्तं पाणिमुक्तं मुक्तामुक्तं तथैव च।
अमुक्ते च धनुर्वेदे चतुष्पादच्छस्त्रमीरितम्।।[5]

नीतिप्रकाशिकायामपि व्यासशिष्यो वैशम्पायनोऽपि कथ्यते। –

मुक्तं चैव ह्यमुक्तं च मुक्तामुक्तमतः परं।
मन्त्रमुक्तं च चत्वारि धनुर्वेदपदानि वै।।[6]

तदनुसारेण यथा –

| **अनु.** | **पादसंख्यां** | **नीलकण्ठटीकायाम्** | **नीतिप्रकाशिकायायम्** |
|---|---|---|---|
| 1 | प्रथमेपादे | मन्त्रमुक्तम् | मुक्तम् |
| 2 | द्वितीयेपादे | पाणिमुक्तम् | हयमुक्तम् |
| 3 | तृतीयेपादे | मुक्तामुक्तम् | मुक्तामुक्तम् |
| 4 | चतुर्थेपादे | अमुक्तम् | मन्त्रमुक्तम् |

**युद्धानि –**

अत्र सप्तानि युद्धाानि यथा–धनुर्युद्धम्–चक्रयुद्धम्– कुन्तयुद्धम्–छुरिकायुद्धम्–गदायुद्धम्–बाहुयुद्धम् स्यादेवं युद्धानि सप्तधा। [7]

1. सप्तानि युद्धानि कर्तुं समर्थः स्यात आचार्यः कथ्यते।
2. चतुर्थानि युद्धानि कर्तुं समर्थः स्यात् भागर्वः इति नाम्नः विख्यातः।
3. द्वयोः युद्धयोः विशारदो स्यात् योद्धा रूपेण कीर्तितः।
4. एकेन युद्धेन समर्थः स्यात् गणकः इति विख्यातः।[8]

**सप्तप्रकाराणां युद्धाणां ज्ञाता –**

युद्धस्य लक्षणं महर्षिणाशुक्रेण स्वनीत्यां कथितं यथा – परस्परं शप्रभावं धारयतः द्वयोः संयतात्मनोः स्वार्थसिद्धयर्थाय किं वा आत्मप्रयोजन– निष्पादनाय अस्त्रास्त्रद्यैः व्यापारः इत्युक्ते युद्धम्।[9]

दैत्यगुरुणा शुक्रेण एवं युद्धभेदाः प्रकल्पिताः।

1. मन्त्रादि प्रयुक्तैः आयुधैः कृतयुद्धं दैविकमयुद्धम्।
2. नालाद्यस्त्रैः किं वा आग्नेयाद्यायुधैः कृतयुद्धम्–आसुरयुद्धम्।
3. शस्त्रबाहुसमुत्थम् –अर्थात् खण्डगादिभिः बाहुभिश्च कृतं युद्धम् मानवीययुद्धम्। [10]

**धनुर्युद्धम् –**

एतत् युद्धं द्वैरथयुद्धरूपेऽपि कथ्यते। रामायणे राम–रावणयोः युद्धम्। लक्ष्मण–इन्द्रजीतयोयुद्धम्। महाभारते अर्जुनकर्णयो युद्धम्। पितामहभीष्मार्जुनयोः युद्धमादि।[11]

**चक्रयुद्धम् –**

चक्रात् युद्धं यथा महाभारते घटोत्कच–कर्णयोः द्वन्द्वयुद्धे चक्रयुद्धं वर्णनमस्ति।

क्षुरान्तं बालसूर्याभं मणिरत्नविभूषितम्।
चिक्षेपाधिरथेः क्रुद्धो भैमसेनिर्जिघंसया।।[12]

तत्र घटोत्कचकर्णयोः युद्धे चक्रायुद्धस्योल्लेखः प्राप्यते। यथा –

आयसानि च चक्राणि भुशुण्डयः शक्तितोमराः।
पतन्त्यविरलाः शूलाः शतधन्यः पट्टिशास्तधा।।[13]

**कुन्तयुद्धम् –**

महाभारते कुन्तयुद्धे विशारदो धर्मराजः युधिष्ठरोऽभवत्। द्वयोः योद्धयोः मध्ये कुन्तेन द्वारा युद्धं करोतीति।

**खड्गयुद्धम् –**

महाभारते धृष्टद्युम्नद्रोणयोः युद्धे द्रोणसमक्षं धृष्टद्युम्नेन खडगयुद्धस्य विविधान् प्रवराश्चैक विंशति मार्गन् दर्शयामास यथा –

भ्रान्तं–उदभ्रान्तम् –आविद्धम–आप्लुतं –प्रसृतं सृतम्।
परिवृत्तं निवृत्तं च खडगं चर्म च धारयन्।।
सम्पातं समुदोर्ण च दर्शयामास पार्षतः।
भारतं कौशिकं चैव सात्वतं चैव शिक्षया।।[14]

महाभारते सहदेवनकुलौ खडगयुद्धे कुशलौ इति। यथा –

तथाति पुरुषानन्यान् त्सारुकौ कुशलौ यमजावुभौ।[15]

**गदायुद्धम् –**

भीमदुर्योधनौ गदायुद्धे विशारदौ यथा –

दोणस्य तु तदा शिष्यौ गदाग्यौ बभूवतुः।
दुर्योधनश्च भीमश्च सदा संशब्दमानसौ।।[16]

महाभारते गदायुद्धवर्णनं यथा –

उपन्यस्तमपन्यस्ते गदायुद्धविशारदौ।
एवं तौ विचरन्तौ तु परस्परमविध्यताम्।।[17]

**बाहुयुद्धम् –**

बाहुयुद्धं विनाशस्त्रस्त्राभ्यां हस्तसहायेन कृतम् युद्धम्। महाभारते भमजरासंधयोः मध्ये एतत्युद्धं भवति स्म।[18] एतं युद्धं मल्लयुद्धरूपेणामपि ज्ञायते। एवं सप्तयुद्धानि सन्ति।

**धनुर्दानविधिः –**

आचार्यः शुभे मुर्हूते धनर्विद्यायाः शिक्षां दधात्। ग्रन्थेऽस्मिन् अन्ये च ज्योतिषशास्त्रानुसारेण शुभमुर्हूतस्योल्लेखोऽस्ति। शुभमुर्हूते दानहोमाभ्यां देवान् सन्त्प्र्यं ब्राह्मणान कुमारीश्च भोजयित्वा वस्त्रालंकारभूषणैरन्नपानादि– भिश्चाचार्य पूजयित्वा कृतोपवासः धृताजिनपरिग्रहः बद्धाञ्जलिपुटः शिष्यः आचार्यं धनुः याचयेत्। आचार्यः वेदविधानतः मन्त्राभिमन्त्रिंत धनुः शिष्याय दधात् शिष्यः तद्धनु गृहीत्वा वेधत्रयं कुर्यात्।[19]

| क्रमः | नक्षत्राणिः | जन्मराशि वा | तिथयः | वासरः |
|---|---|---|---|---|
| 1 | रेवती | तृतीयस्थाने | तृतीया | रविवासरः |
| 2 | हस्तः | षष्ठस्थाने | प×चमी | शुक्रवासरः |
| 3 | पुनर्वसुः | सप्तमस्थाने | सप्तमी | गुरुवासरः |
| 4 | पुष्यः | सप्तमस्थाने | दशमी | त्रयाः शुभवासरः[20] |
| 5 | रोहिणी | एकादशस्थाने | त्रयोदशी आदितिथयः धनुर्वेद –शिक्षारम्भे शुभाः इति | |
| 6 | उत्तरा फाल्गुनी | चन्द्रस्थ स्थितिः | | |
| 7 | उत्तरा भाद्रपदा | | | |
| 8 | उत्तराषाढ़ा | | | |
| 9 | अनुराधा | | | |
| 10 | अश्विनी | | | |

**चापवर्णनम् :–**

अस्मिन् विभागे अस्त्रशस्त्राणां परिचयं वर्णितम् –

**गुणलक्षणानि :–**

गुण इत्युक्ते प्रत्यञ्चा।[20] अयं गुणः कनिष्ठामानसम्मितः सूत्रकृतः शुद्धैस्त्रिगुणतन्तुभिः वर्णितः धनुः प्रमाणः श्लक्ष्णो युधि सर्वकार्यसहृदः स्यात्।[21]

अभावे पट्टसूत्रस्य हरिणी स्नायुभिः
महिषी स्नायुभिः वा।।[22]

तत्कालहत छात्रस्य तन्तुना प्रत्यञ्चः कार्याः

शिवप्रोक्तधनुर्वेदे कथ्यते हि

अभावं प्रट्टसूत्रस्य हरिणो स्नायुरिष्यते।
गुणार्थमय संग्राह्याः स्नायवो महिषो गवाम्।।
तत्काले हत् गोकर्णचर्म्म वा छाग्वलस्य वा।
विलोमतन्तुरूपेण कुर्याद्वा गुणमुत्तमम्।।[23]

अर्थात् पट्टसूत्रस्याभावे – हरिणः स्नायुभिः
महिषी स्नायुभिः।
गोः स्नायुभिः। अथवा

तत्कालात् गोकर्णचर्तस्य छागलस्य च तन्तुना गुणः कार्यः।

पट्टसूत्रेणसन्नद्धः पक्ववंशल्वविनिर्मितः गुणः स्थावरो दृढ़श्च भवति। मुञ्जानानि गुणः युधि सर्वकर्मसो भवति।[24] यथा शिवधनुर्वेदे पक्ववंश त्वचा कार्यो गुणस्तु स्थविशरोदृढ़। पट्टसूत्रेण सन्नद्धिः सर्वकार्यं सहोयुधिः।।[25]

शिवधनुर्वेदे अर्कसूत्रतन्तूनां प्रत्य×चापि प्रशस्यते यथा –

प्राप्ते भाद्रपदे मासे त्वगर्कस्य प्रशस्यते।
तस्यास्तत्र गुणः कार्यः पवित्रः स्थावरो दृढ़ः।।
वृचार्कसूत्रतन्तूनां हस्ता अष्टादश स्मृताः।
तद्धतं त्रिगुणं कार्यं प्रमाणोऽयं गुणस्य।।[26]

**वेधविधिः –**

आचार्यो शुभे मुर्हूते धनुवर्विद्यायाः शिक्षां दधात् तर्हि वेदविधनतः अभिमन्त्रितधनुः आचार्येण शिष्यं दत्तम् तत्धनुः स्वीकृत्य शिष्यो धनुर्विद्यायाः अभ्यासं करोति स्म। अभ्यासान्तर्गतं चापोपरि बाणस्य सन्धानं कृत्वा गुरवादेशात् छात्रः कोऽपि लक्ष्यं स्थापयित्वा वा धारयितवा लक्ष्यभेदेन करोति इति वेधः।

आचार्यदत्तः धनुः गृहीत्वा प्रथमम्

फलहीनेन बाणेन पुष्पवेधं कुर्यात्।
ततः फलयुक्तेन पत्रिणा मत्यस्यवेधं कुर्यात्।
ततः फलयुक्तेन पत्रिणा मांसवेधं कुर्यात्।

एवं वेधत्रयं कृत्वा ततः प्रणम्य गुरुवे धनुर्बाणान्निवेदयेत्।[27]

यथा शिवोक्तधनुर्वेदे कथ्यते हि –

प्रथमं पुष्पवेधञ्च फलहीनेन पत्रिणा।
ततः फलयुतेनैव मत्स्यवेधञ्चकारयेत्।।
मांसवेधन्ततः कुर्य्यादेवं वेधो भवेत्त्रिधा।
पुर्व्ववेधैः कृताः पुंसां शराः स्मः सर्व्वसाधकाः।।
एवं वेधत्रयं कृत्वा शङखदुन्दुभिः निस्वनैः।
ततः प्रणम्य गुरुवे धनुर्बाणान्निवेदयेत्।।[28]

**फललक्षणम् :–**

फललक्षणस्य वर्णनमपि अस्त्रशस्त्रस्य प्राप्यते।

**शरोपरिपायनम् :–**

औषधलेपनम् पायनमिति कथ्यते। यदा शरवंशसमूहे स्वातिनक्षत्रे मेघबिन्दवः पतन्ति स पीतवर्णो भवति। तदा मूले विषमुत्पद्यते। तन्मूलं ग्राह्यम्। शरस्य फलोपरि तस्य चूर्णस्य लेपेनं करणीयम् तदा तत्फलं विषयुतं भवति। एतादृशेन बाणेनाहतः योद्धा जीवितुं न शक्नोति।[29]

बाणफलोपरि दिव्यौषधिलेपनात् औषधविलेपित्वाबाणेन दुर्भेद्यलोहवर्म –मपि वृक्षपर्णवत् भेदयेत्।

पिप्पली–सैन्धवं–कुष्टंद्रव्यत्रयाणि गोमूत्रेण सुपेषयत्। अनेन शस्त्रं लेपयेत् लिप्तास्त्रं चाग्नौ प्रतापयेत्। अग्नौ प्रतायात् शिखिग्रीवानुवर्णाभं तप्तपीतं ततास्त्रं ततस्तु विमलेन तोयेनपायेत्। तदा तत्शस्त्रमुत्तमम् भवेत्।[30]

भगवान शिवेनऽपि कथितम् यथा –

फलस्य पायनं वक्ष्ये दिव्यौषधि विलेपनम्।
येन दुर्वेध्यं वर्म्माणि भेदयेतरु–पत्रवत्।।
पिप्पली सैन्धवं कुष्ठं गोमूत्रेण च पेषयेत्।
अनेन लेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत्।
आविष्पातं बलाविंद्धं पीतमग्नौ तथौषधम्।।
ततो निर्व्वापितं लोहं तत्र वेधे विशिष्यते।।[31]

भगवताशिवेन पायननिर्माणाय एकापरविधिः प्रदाता।

पञ्चभिलंवणैः पिष्टैमंघुसिक्तैः ससर्षयैः।

एभिः प्रलेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत्।।[32]

आयुर्वेदे पञ्चप्रकारस्यलवर्णानि यथा –

1. कृष्णलवणम्।
2. सैन्धवलवणम्।
3. विहलवणम्।
4. सामुद्रलवणम्।
5. उद्भिवलणम् (रेहलवणम्) [33]

**स्थानानि :–**

लक्ष्यवेधने काले तथा युद्धकाले च धनुर्धारिणः विविधानि स्थानन्यवलम्ब्य बृणान प्रक्षिपन्ति। इमानि स्थानानि लोके पैतरां शब्देनाभिधीयन्ते। विरचिन्तामण्यामादिग्रन्थेषु अष्टप्रकाराणि स्थानानि प्रदर्शितानि। अग्निपुराणेऽपि स्थानानामष्टभेदानां लक्षणेन सह वर्णनं उपलब्धमस्ति। वर्णानानुसारेण ज्ञातव्यं यत् स्थानम् शब्दस्योऽर्थः युद्धस्थले धनुर्धारिणः बाणानुसन्धनायावश्चकस्थिति इत्युक्ते

अष्टौ स्थानानि भिन्नकर्मणां योजने प्रयुक्तानि भवन्ति। यथा महर्षिणा वशिष्ठेनापि प्रत्यालीढ–विशाख–आलीढ–समपाद–विषमपाद–दुर्दरक्रम–गरुडक्रम– पद्यासनमभित्येतानि स्थाना प्रदर्शितानि। इमानि स्थानानि सोद्देश्यानि भवन्ति। यथा भगवता शिवेनऽपि कथितम् यत् –

स्थानान्यष्टौ विधेयानि योजयेद्भिन्नकर्मणा।[34]

**1.आलीढस्थानम् :–** दक्षिणपादः अग्रे कृत्वा वामपादं जानुने वक्रं कृत्वा हस्तौ पृष्ठं कृत्वा यत्स्थानं भवति तत् आलीढम् इति। यथा –

आलीढं तु प्रकर्तव्यं सव्यं चैवानुकूञ्चितम्।

दक्षिणन्तु पुरस्ताद्वां दूरयाते विशिष्य ते।।[35]

शिवधनुर्वेदे तस्यविवरितं मतमस्ति यथा –

अग्रतो वामपदं च दक्षिणं जानुकुञ्जितम्।

आलीढं तु प्रकर्तव्यं हस्तद्वयविस्तरम्।।[36]

अग्निपुराणे यथा – यस्मिन्नस्थाने दक्षिणजङ्घा दक्षिणजानुश्चाकर्षितौ च द्वयोः पादयोः मध्ये पञ्चवितस्तस्य विस्तारमस्ति स्यातालीढमिति।[37]

**2.प्रत्यालीढम् :–**

प्रत्यालीढस्थानं आलिढस्थानस्यविपरीतावस्थायां प्रत्यालीढं कथ्यते। यथा –

अग्रतो वामपादश्च दक्षिणं चानुकुञ्जितम्।
प्रत्यालीढं प्रकर्तव्यं हस्तद्वयसविस्तरम्।।[38]

तेन विपरीतं यथा शिवोपदेशे ईदृशं वर्तते। तद्यथा –

प्रत्यालीढं तु कर्तव्यं सव्यं चेदानुकुञ्जितम्।
दक्षिणं च पुरस्तद्वद्दूरयाते विशिष्यते।।[39]

अग्निुपराणे यथा –

एतदेव आलीढं विपर्यस्तं प्रत्यालीढमिति स्मृतम्।
तिर्य्यग्भूतो भवेद् वामो दक्षिणोऽपि  भवेदृजुः।।[40]

**3.विशाखम् स्थानम् :–**

यदा द्वौ पादौ बाह्याङ्गयाधारेण स्थितौ द्वौ जानू स्तब्धं स्तः तदा विशाखम् स्थानम्[41] इति कथ्यते। भगवता शिवेन यथा –

पादौ सुविस्तारौ कार्यौ समो हस्तप्रमाणतः।
विशाखस्थानकं ज्ञेयं कूटलक्षरस्य वेधने।।[42]

वशिष्ठ धनुर्वेदे यथा–

पादौ सविसतारौ कार्यौ समौ हस्तप्रमाणतः।
विशाखस्थानं ज्ञेयं कूटलक्षरस्य वेधने।।[43]

**4.समपादम् स्थानम् :–**

शिवधनुर्वेदे वशिष्ठ धनुर्वेदे च एकैवश्लोकाः दीयते। यथा –

समपादेः समौ पादौ निष्कम्पौ च सुसंगतौ।
असमे च पुरो वामे हस्तमात्रे नतं वपुः।।[44]

यथा अग्निपुराणे –

अ्रुष्ट–गुल्फ–पाण्घ्रः श्लिष्टाः सहिता स्युः तर्हि स्थानमेतत समपदम् इति।

**5.स्थानकम् स्थानम् :–**

स्थानकम् स्थानम् शिवधनुर्वेदे दुर्दुरक्रमभित्युच्यते। यथा –

आकुञ्चितोरु द्वौ यत्र जानुभ्यां धरणिगतौ।
दर्दुरक्रममित्याहु स्थानकं दृढ़भेदने।।[45]

महर्षिवशिष्ठेनाऽपि स्थानकस्य एवमेव लक्षणं उद्धृतम् –

आकुञ्चितोरु द्वौ यत्र जानुभ्यां धरणीं गतौ।
दर्दुरक्रममित्याहुः स्थानकं दृढ़भेदेने।।[46]

अग्निपुराणानुसारेण यथा –

गुल्फौ पार्ष्णिग्रहौ चैव स्थितौ पञ्चाङ्गलान्तरौ।
स्थानं जातं भवेदतद् द्वादशागुलमायतम्।।[47]

**6.गरुड़क्रमस्थानम् :–**

वामजानुगतौ भूमौ च दक्षिणपादं अग्रे कृत्वा सकुञ्चितं कुर्यात् तदा यत् स्थाने भवति तद् गरुड़क्रमम्।[48] यथा भगवता शिवेनऽपि कथितम् –

सव्यं जानुगतं भूमौ दक्षिणं च सकुञ्चितम्।
अग्रतो यत्र दातव्यं तं विद्याद्गरुडक्रमम्।।[49]

गरुडक्रमस्य लक्षणं अग्निपुराणे ईदृशं प्रदत्तम् –

ऋजुजानुर्भवेद् वामो दक्षिणः सुप्रसारितः।
अथवा दक्षिणञ्जानु कुञ्जं भवति निश्चलम्।।
दण्डायतो भवददेष चरणः सह जानुना।
एवं विकटमुद्दिष्टं द्विहस्तान्तरमायतम्।।[50]

अत्र अग्निपुराणे गरुड.क्रमम् विकटमिति संज्ञा ज्ञायते।

**7.पद्यमासनस्थानकम् :–**

पद्यमासनकृते महर्षिणा विशेषतः किमपि न उक्तम्। यथा –

पद्यमासनं प्रसिद्धन्तु ह्युपविश्य यथाक्रमम्।
धन्विनां तत्तु विज्ञेयं स्थानकं शुभलक्षणम्।।

भगवता शिवेनऽपि एवमेव वर्णितम् –

पद्यामसनं प्रसिद्धन्तु उपविश्य यथाक्रमम्।
धन्विनां तत्तु विज्ञेयं स्थानकं शुभलक्षणम्।।

**मण्डलस्थानम् :–**

हंसपंक्त्याकृतिसमे दृश्यते यत्र जानुनी।
चतुर्वितस्तिविच्छिन्ने तदेतन्नमण्डलं स्मृतम्।।[51]

**सम्पुटस्थानम् :–**

जानुनी द्विगुणे स्यातामुत्तानौ चरणावुभौ।
अनेन विधि योगेन सम्पुटं परिकीर्तितम्।।[52]

एतानि अष्टस्थानानि भिन्नकर्मणां योजने प्रयुक्तानि भवन्ति। इमानि सोद्देश्यानि भवन्ति। यथा –

| क्रम | स्थानम् | उद्देश्यम् |
|---|---|---|
| 1 | आलीढयस्थानम् | बाणस्य दूरपातने |
| 2 | विशाखम् | कूटलक्ष्यवेधने |
| 3 | दुर्दुरक्रम | पुरतः दूरपातने |
| 4 | गरुडक्रमम् | दृढ़भेदने |
| 5 | सम्पादक्रमम् | |
| 6 | विषमपादक्रमम् | |
| 7 | पद्मासनम् | |
| 8 | | |

**गुणमुष्टिः –**

दक्षिणहस्तस्यांगुलिभिः धनुषः गुणस्य ग्रहणसूचकाः नियमाः गुणमुष्टि– पदेनाभिहिता भवन्ति। इमां गुणमुष्ट्यः पञ्चधा भवन्ति। यथा –

शिवधनुर्वेदे –

पताका वज्रमुष्टिश्च सिंहकर्णी तथैव च।
मत्सरी काकतुण्डी च योजनीया यथाक्रमम्।।[53]

यथा –

1. पताका ।
2. वज्रमुष्टिः।
3. मत्सरी।
4. काकतुण्डींश्चेति पञ्चधा।

**1.पताका :–**

तर्जनीं च अङ्गुष्ठस्य मूलदेशं गृहीत्वा दीर्घम् आायत् करणीयम् इत्युक्ते पताका।

**2.वज्रमुष्टिः –**

तर्जनी–मध्यमाद्वयोर्मध्ये अंगुष्ठः विशते तर्हि वज्रमुष्टिः उच्यते।

**3.सिंहकर्णमुष्टिः –**

अ›ुष्ठस्य नखस्य मध्यभागे तर्जन्याः अग्रभागं दृढ़तापूर्वकं संस्थापनं करणीयमिति सिंहकर्णः।

**4.मत्सरीमुष्टिः –**

अङ्गुष्ठस्य नखस्य मूलस्थाने तर्जन्याः अग्रभागं दृढ़तापूर्वकं संस्थापितं करणीयम्। इति मत्सरी।

**5.काकतुण्डिमुष्टिः –**

अङ्गुष्ठस्याग्रभागे तर्जन्याः मुखं यदि दृढ़तापूर्वकं सन्निविष्टं स्यात् काकतुण्डीति।[54]

| | |
|---|---|
| 1. मुष्टिनामानि | तेषां कर्माणिः |
| 2. पताका | नालिकास्त्रप्रयोगे |
| 3. वज्रमुष्टिः | नाराचबाणप्रयोगे |
| 4. सिंहकर्णः | दृढ़लक्ष्यभेदनम्। |
| 5. मत्सरी | चित्रलक्ष्यभेदनाय। |
| 6. काकतुण्डी | सूक्ष्मलक्ष्य भेदनाय।[55] |

इयमपि यथाक्रमेण योजनीयाः। विशिष्टप्रयोजनमुद्दिश्य तत्साधिका गुणमुष्टिः प्रयुज्यते।

**धनुर्मुष्टिसन्धानम् :–**

वामहस्तने धनुषः मध्यभागस्य ग्रहणं धनुर्मुष्टिरिति कथ्यते। धनुर्मुष्टि– सन्धानं त्रिविधं भवति। यथा –

1. अधःसन्धानम।
2. उर्द्ध्वसन्धानम्।
3. समसन्धानम्।

| | |
|---|---|
| बाणस्य दूरपतित्वे | – अधः सन्धानम्। |
| दृढस्फोटनार्थे | – उर्ध्वसन्धानम्। |
| निश्चले लक्षे | – समसन्धानम्।[56] |

**धनुर्व्यायाः –**

धनुषः आकर्षणप्रणाली व्यायपदेन गृह्यते। व्यायाः पञ्चधा भवन्ति। यथा –

1. केशस्य मूलपर्यन्तं वाणाकर्षणाय – कैशिकव्यायः।
2. श्रृङ्गः अर्थात् शिरस्याग्रभागपर्यन्ताकर्षणाय – सात्विकव्यायः।
3. कर्णपर्यन्तं आकृष्टाय – वत्सकर्ण व्यायः।
4. गलपर्यन्तं, किंवा ग्रीवायां आकृष्टाय – भरतव्यायः।
5. स्कन्धयपर्यन्तं शराकर्षणाय – स्कन्धव्यायः इत्युच्यते।[57]

| **व्यायः** | **प्रयोजनानि** |
|---|---|
| कैशिकः | चित्रयुद्धाय |
| सात्विकः | अधोलक्ष्याय |
| वत्सकर्णः | तिर्यक्लक्ष्याय |
| भरतः | दूरभेदनाय |
| स्कन्धः | दूरघातने[58] |

**लक्ष्यम् :–**

धनुर्धरः चापोपरि शरं स्थापयित्वा किमपि वस्तुं धारयित्वा तद्ववस्तुं वेधनं करोति वस्तुं लक्ष्यमिति उच्यते । लक्ष्यं चतुर्विधं भवति।

1. स्थिरम्।
2. चलम् ।
3. चलाचलम्।
4. द्वयचलङ्चेति।[59]

भगवता शिवेन कथिता यथा –

लक्ष्यं चतुर्विधं ज्ञेयं स्थिरं चैव चलं तथा।
चलाचलं द्वयचलं वेधनीयं क्रमेण तु।। [60]

1. आत्मस्थाने स्थितः यः धन्वी चलं लक्ष्यं वेधयति तञ्चलक्ष्यं भवति। इति वेधी चलवेधीति कथ्यते।[61]
2. वेध्यंवस्तु यथा वेगेन भ्रमति, धनुधार्यपि तल्लक्ष्यं वेधयितुं वेगेन भ्रमति, इति तल्लक्ष्यं द्वयचलमिति कथ्यते।[62]

3. यदा लक्ष्यं स्थिरं भवति, धनुर्धारी भ्रमन् तत्लक्ष्यं वेधयति तत्तु चलाचलं लक्ष्यम् कथ्यते।[63]

4. द्वयचललक्ष्यवेध बहुश्रमेणं साध्यते।यथा –

उभौभावे चलौ यत्र लक्ष्यं चापि धनुर्धरः।
तद्विज्ञेयं द्वयचलं श्रमेणणैव हि साध्यते।।[64]

**लक्ष्याभ्यासः –**

प्रथमं वामहस्तेन लक्ष्याभ्यासः कार्यः अनेन प्रकारेणाचिरादेक्रियासिद्ध– र्भवति। वामहस्ते संसिद्धे ततः दक्षिणहस्तेनाभ्यासः कार्यः।

उदिते भास्करे – पश्चिमायाम् दिशि लक्ष्यं स्थापनीयम्।
चापराह्ने – पूर्वस्याम् दिशि लक्ष्यं स्थापनीयम्।
सर्वदा – उत्तरस्यां दिशि तु लक्ष्यस्थापयेत्।
विना सङ्ग्रामेण – दक्षिणाभिः मुखं लक्ष्यं न कार्यम्।[65]

**अनाध्यायः –**

यदा किमपि कारणवशात् अभ्यासदिनेऽवकाशं भवति स्यात् 'अनाध्यायः' इति उच्यते।

अष्टमी–अमावस्या–चतुर्दशी तथा पूर्णिमार्द्धिदिनं शस्त्रविषयकेषु सर्वकमर्षु निषिद्धमस्ति।[66]

अकाले प्रभाते वा मेघे गर्जिते दुर्दिने
अनुराधाऩक्षत्रदारभ्यमृगश्िषरानक्षत्रपर्यन्तम्

स्थिर भास्करे–

अभ्यासकाले सर्पदर्शने।,

चापे गुणे वा त्रुटितेऽनध्यायो भवति।[67]

एतादृशे योगे समुत्पन्ने श्रमं न कुर्यात्।

**सज्जीकरणम् (श्रमक्रिया) :–**

प्रथमं धन्वी चापे बाणमारोप्य ततः चूलिकां वध्नीयत्। ततः स्थानकं कृत्वा वाणोपरि करं न्यसेत्। वामपणिना धनुषस्तोलनं कर्तव्यम्। ततः संधानमाचरेत्। ततः शिवं गुरुं विघ्नराज धनुः शरांश्च नमस्कुर्यात्। गुरावुपस्थिते सति तस्याज्ञां याचितव्या। ततः प्राणक्रियां कुर्वन् हुङ्कारपूर्वकं बाणं विसर्जयेत्। अनेन प्रकारेण धन्विना अभ्यासक्रिया कार्या।[68]

**दुःसाध्यलक्ष्यवेधनम् :—**

साधारणलक्ष्याणां वेधनस्याभ्यासे संजाते ततः धन्वी अयश्चर्ममृत्यिपण्ड —घटानाम् च वेधने अभ्यासं कुर्यात्। ततः —

1. दुरस्थितम्।
2. चित्रवेधनम्।
3. काष्ठवेधनम्
4. धावल्लक्ष्यवेधनम्।
5. शब्दवेधनादिकं

दुःसाध्यं लक्ष्यवेधनम् सम्यगधीत्य तेषु अभ्यासः कार्यः। [69]

**व्यूहादिर्भियुद्धकथनम् :—**

राजा स्वरक्षणाय ये राजपुत्राः सामन्ताः आप्तजनाः सेवाकजातयः तान् सर्वान् आत्मनः पार्श्वे स्थापयेत।[70]

महाभारतेऽपि महाराजयुधिष्ठिरेऽपि यथा —

अभिमन्युं बृहन्तं तथा द्रौपदेयाश्च सर्वशः।
धृष्टद्युम्नमुखानेतान् प्राणिर्णात पाण्डुनन्दनः।।

तदन्तरे — भीमं च युयुधानं च पाण्डवं च धनंजयम्।
द्वितीय प्रेषयामास बलस्कन्धं युधिष्ठरः।।

पश्चात् — स्वयमेव ततः पश्चाद् विराटद्रुपदान्वितः।
अथा परैर्महीपालैः सह प्रायन्महीपतिः।।[71]

**कौरवसेनायामपि —**

अश्वत्थामा शान्तनवः सैन्धवोऽथ जयद्रथः।
दाक्षिणात्याः प्रतीच्याश्च पर्वतीयाश्च ये नृपाः।।
गान्धारराजः शकुनिः प्राच्योदीच्याश्च सर्वशः।
शकाः किराता यवनाः शिबयोऽथ वसातयः।
स्वैः स्वैरनीकैः सहिताः परिवार्य महारथम।
एते महारथाः सर्वे द्वितीये निर्ययुबले।।[72]

युद्धे योद्धाः परस्परानुरक्ताः शाङ्गधनुर्धारणकर्तार.युद्धकलामर्मज्ञाः तुरगारूढ़ा। रणे जयन्ति रिपून् तान् लक्षणयुक्तान् योद्धान् युद्धे स्थापयेत्।[73]

महाभारते युद्धेऽपि कौरवसेनायां ईदृशीयोद्धा नां सैन्यरचनां वर्णितम् यथा —

सर्वे ब्रह्मविदः शूराः सर्वे सुचरित व्रताः।
सर्वे वर्मभृतश्चैव सर्वे चाहवलक्षणाः।।
आहवेषु पराल्लोकान् जिगीषिन्तो महाबलाः।
एकाग्रमनसः सर्वे श्रद्धानाः परस्परम्।।[74]

अस्मिन् श्लोके सेनानायकस्य महत्वं प्रतिपाद्यते। एकः कापुरुषोः द्रोणो सेनानायकः स्वस्यां विशालां वाहिन्यामपि पराजिता करोतीति। एको भयभीतो द्रीणो(भयभीताः) सेनानायको स्यात्तर्हि समुहतीं सेनामपि द्रीर्णां भूत्वा भीतेन सेनानायकेन सह भग्नां जाता। तदा तद्दीर्णां–भीतां–भग्नां सेनां शूरतमा योद्धापि न वारयतां समर्थाः इति। अतः सेनायां कातरसेनानायकस्य नियुक्तिं नृपेण न करणीयः।[75] यथा महाभारते –

एको द्रीणों दारयति सेनां सुमहतीमपि।
तं द्रीर्णामनुदीर्यन्ते योद्धाः शूरतरा अपि।।
दुर्निवार्त्या तदा चैव प्रभग्ना महती चमूः।
अपामिव महावेगास्त्रस्ता मृगगण इव।।[76]

महर्षिणा शुक्राचार्येणपि कथितं यत् कदाचन वैश्यो न शूद्रश्र्चेन च कातरश्च सर्वासु जातिषु शूर एव सेनापतिः योज्यः। भयभीतं पलायनीकृतेकं सैनिकं दृष्टवा सहसा सम्पूर्णदिशिः सेना विदवते। तान् भग्नान् सैनिकान् शूरैरपि पुनः स्थपयितुं नैव शक्या। यथा भीतान् भग्नांश्च सैनिकान् दृष्ट्वा शूरैरपि सुयुद्धविद्वांसोऽपि दीर्यन्ते यथा –

नैव शक्या समाधातुं संनिपाते महाचमूः।
दीर्णामित्येव दीयन्ते सुविद्धांसोऽपि भारत।।
भीतान् भग्नांश्च सम्प्रेक्ष्य भ्यं भेयोऽभिवर्धते।
प्रजग्ना सहसा राजन् दिशो विद्रवते चमूः।
नैव स्थापयतुं शक्यो शूरैरपि महाचमूः।।[77]

पुनः महर्षिवशिष्ठो कथितं यत् युद्धे वीरतापूर्वकप्राणत्यक्तयोद्धा च योगयुक्त सन्यासी सूर्यमण्डलं भेदयित्वा स्वर्गलोके गतः।

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।
परिव्राजयोगयुक्तश्च रणेः चाभिमुखोहतः।।[78]

महाभारते योगयवतस्याचार्यद्रोणस्य गतिवर्णनं एवमस्ति। शूरवीरैः झटिः तत्पदं अवाप्यते। यथा –

मुखं किंचित् समुन्नाम्य विष्टभ्य उरमग्रतः।
निमिलिताक्षः सत्वस्थो निक्षिप्य हृदिः धारणम्।।
ओमित्येकत्क्षरं ब्रह्म ज्योतिर्भूतो महातपाः।

स्मरित्वा देवदेवेशमक्षरं परमं प्रभुम्।।
दिवमाक्रामदाचार्यः साक्षात् सिद्धिर्दुराक्रमाम्।
द्वौ सूर्याविति नो बुद्धिरासीत् तस्मिस्तथागते।।
एकाग्रमिव चासीच्च ज्यतिर्भिः यूरितंनभः।
सम्यद्यत चार्काभे भारद्वाजदिवाकरे।।
निमेषमात्रेण च तज्ज्योतिरन्तरधीयत।
आसीत् किलकिलाशब्दः प्रहृष्टामो दिवोकसाम्।।[79]

यथा शुक्रनीत्यो आहवेषु युद्धेषु मित्थः एकान्ते अन्योऽन्यं परस्परं हन्तुमिच्छन्तः परमात्यर्थं शक्त्या युद्धमानाः युद्धय च अपराङ्गमुखान् भवेत् स स्वर्गं यान्ति। अन्यच्च [80] यः शूरवीरः स्वामिनः अर्थे सेनानमग्ने विक्रमेत। भयात् न निर्वतेत च तस्य अक्षयः स्वर्गः हि यान्ति। [81] आहवे युद्धे निहतं शूरं कदाचन न शोचेन यः सर्वपापेभ्यः विमुक्तः पूतो सुलोकनां पुण्यवतां प्राप्नोति। वराणमसारणम् सहस्ररूपाणि त्वरमाणाः सत्यसङ्ग्रामे। हतं शूरवीरं अयं एषः ममभर्ता भवेत् मम स्वामी भवेत् इत्युक्त्वा तेन प्रति प्रधावन्ति।[82]

रणक्षेत्रे मूर्छितं विकलं शस्त्राश्त्ररहितं न हिंसयेत् पलायमानं शरणागतंश्च न हिंसयेत्। अन्यच्च बलियसां योद्धां ज्ञातव्यं यत् भीरुः पलायमानोऽपि सैनिकस्य नान्वेष्टव्यो च शरणागतसैनिकानां शरणं दापयेत्। यथा महाभारते कौरवसेनापयितना पितामहेन भीष्मेनोक्तं यत् –

निक्षिप्तशास्त्रे पतिते विमुक्तकवचध्वजे।
द्रवमाणे च भीते च तवास्मीति च वादिनि।
स्त्रियां स्त्रीनामधेये च विकले चैवपुत्रके।
अप्रशस्ते नरे चैव न युद्धं रोचते मम्।।[83]

रणसंग्रामे युद्धविजयात् लक्ष्मीश्च मृते स्वर्गं प्राप्स्यते एवं धरातले कीर्तिं प्राप्यते येन कारणेन धैर्यं धारयित्वा हन्तव्या शत्रुसेना। [84] एवं भगवता कृष्णेनापि अर्जुनमुपदिशति यथा –

हतो वा प्राप्स्यति स्वर्ग जित्वा वा मोक्ष्यसे महीम्।
तस्मादुतिष्ठ कौन्तेय युद्धाय कृत निश्चयः।।[85]

युद्धे विजयोच्छुकनृपस्य कर्तव्यं यत् स्वस्य विशाला चतुरंगिनी सेनां व्यूहबद्धां कृत्वा चतुर्ष शूरवीरान् स्थापयेत। युष्द्धकाले यस्य नृपस्य युद्धेन वायवो वान्ति पृष्ठे भावस्थितः वा पृष्ठे वायसाः उडड्यनं कुर्वन्ति अनुालभेत मेघाश्च तस्य रणे जयः भवतीतिं न संशयः।[86]

जिते लक्ष्मीर्मृते स्वर्गः कीर्तिश्च धरणीतले।[87]

अत्र क्षत्रियाणां कृते युद्धं अवश्यभवीरूपेण कल्पित। रणाड्गने युद्धविजयात् लक्ष्मी युद्धेः मरणात् स्वर्गः एवं धरणीतले कीर्तिश्च प्राप्नुवन्ति [88] अर्थात् युद्धे योगं निरर्थकं नास्ति। भगवता कृष्णेन महाभारतेऽर्जुनमुपदेशितं यत् –

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा मोक्ष्यसे महीम्।
तस्मादुतिष्ठ कौन्तेय युद्धाय कृत निश्चयः।।[89]

आगन्तुकयुद्धस्य स्वागतं न कृत्वा यो क्षत्रियो युद्धं न करोति तदा स स्वधर्मं कीर्तिं च हित्वा पापं वाप्स्यति एवं च –

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणदितिरिच्यते।।[90]

अतः धैर्यं धारयित्वा शत्रुसैन्यस्य संहारं करणीयमिति। यथा –

अधर्म्मः क्षत्रियस्यैषः यद् व्याधिं मरणं गृहे।
यदाजौ निधनं याति सोऽस्य धर्म्मः सनातनः।।[91]

महर्षिणा वशिष्ठेन कथितं यत् क्षत्रियाय व्याध्याधिनो भूत्वा मरणमधर्मोऽस्ति यो युद्धे–संग्रामे निर्भयेन शत्रुं हत्वा वीरगतिं प्राप्स्यति सो तस्य सनातनधर्मः इति।[91]

महाभारते धृतराष्ट्रेन संजयममुक्तं यथा –

'क्षत्रियधर्मः किल रणे तनुत्यागो हि पूतितः।।[92]

रणसंग्रामे हर्षेण शरीरस्य त्यागं करोति स एव क्षात्रधर्मोऽस्ति। एवं रणाग्रे शरीरत्यागकर्तारो एवं संसारे पूजितः शरशय्यायितामहभीष्मं कर्णेन कथितं यत् –

मयि सूयोधनमाश्रित्य नित्यं पाडवाः कोपिताः यत्.क्षत्रियवंशो व्याधिनो भूत्वा मरणं चैतद् स्यादिति।[93]

दैत्यगुरुशक्रस्य कथनं यत्

शय्यायां मरणं भवेत् एषः क्षत्रियस्य अधर्मः। श्लेषमपितानि शरीरात् विसृजन कृपणं परिदेवयन अविक्षित्वेन शरीरेण लयं योऽपिगचछसि,

क्षत्रियस्य अस्य तत कर्म शय्यामरणरूपं, पुराणविदः इतिहासाज्ञः पण्डिताः न प्रशंसन्ति।[94]

अतः शोण्डीरणां गर्वशाकिनां क्षत्रियाणां तत् गेहेशय्यावामरणं कृपणं हीनहीनमरणं अशौण्डीरं (स्वाभिमनं–स्वामानं– गर्ववितष्करं) अधर्मं, पापकरञ्च भवति। अतः ज्ञातिभिः परिवारितः रणेषु अकदनं शत्रोरदलनं कृत्वा शस्त्रास्त्रैः: सुक्षतविक्षतात् सुक्षतविक्षतात् शरीरात् हननं योग्यो भवति।[95]

अथ व्यूनाह –युवास्वरेण युक्ता मध्यसेना विना आलस्येन युद्धं करणीयमं। पार्श्वयोश्चेता –एक–द्वै सेनयोः नियुक्तेन च पृष्ठतः एका पृष्ठसेनायाः पृष्ठभागस्य रक्षणाय नियुक्तव्यम् एका विकटसेना युद्धक्षेत्रात् दूरं भ्रामयेत सर्वदा रक्षणार्थे।[96]

रामायणेऽपि भगवानरामस्य वानरसेनाया सह यात्रा एवं महर्षि वशिष्ठस्य कथनानुसारेण अस्ति। यथा –

अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम्।
वृत्तः शतसहस्रेण वानराणां तरस्विनाम्।।
गजश्च गिरिसंकाशो गवश्च महाबलः।
गवाक्षंश्चाग्रतो यातु गवां दृप्त इवर्षभः ।। [97]

** ** **

सुषेणो जाम्बवोश्चैव ऋक्षैबहुभिरावृतौ।
सुग्रीवं पुरतः कृत्वा जघनं संरक्षतुः।।
तेषां सेनापतिवीरो नीलो वानरपुगवः।
सम्वतन् फलवतां श्रेष्ठस्ताद् बलं पर्यकारयत्।।[98]

व्यूहस्य अग्रे सैन्यस्य व्यवस्था इति एका विशेषशैल्यं युद्धाङ्गेन सेनायाः व्यवस्था। युद्धक्षेत्रे एकाव्यवस्थितसैन्यस्य तुलनायां व्यवस्थित–व्यूहबद्धसेनाधिक शक्तिशालिना भवति।

युद्धस्य प्रथमसंकेतो वेदे प्राप्तः। तत्र अथर्ववेद –अस्माकं सेना नागपंक्त्या अमित्राणां सैन्यात् स्यस्य सैन्यबलस्य रक्षणस्योल्लेखः प्राप्नोति।[99] भगवतारामभद्रेण गरुडव्यूहस्य सैन्यं व्यवसितिं कृत्वा लंकोपरि आक्रमणं कृतम्[100]

रामायणे गरुडपुराणस्य वर्णनं ईदृशं वर्तते। यथा –

वानरसेनायां नीलेन सह अ›द उरसि तिष्ठेत्। ऋषभानां वानरः वानरवहिन्यां वामे पाश्वेऽधितिष्ठतः। लक्ष्मणेन सह अहमस्य व्यूहस्य मूर्धि स्थास्यामि। जाम्बवांश्व सुषेणश्च वेगदर्शी च वानरः ऋक्षेयेनायाः

मुख्यायाश्च वीराः सैन्यव्यूहस्य कृक्षिं रक्षन्तु ते त्रयः। यथा प्रचेता वरुणस्य लोकस्य पश्वाश्च रक्षणं करोति। तथैव वानरराज सुग्रीव वानरवाहिन्या पृष्ठभागस्य वृतः।[101]

वैदिकभारतीयाः स्वस्य सेनायाः निम्ननामानुसारेण वा वर्गानुसारेण विभाजितं करोति यथा – 1.उरस् किं वा केन्द्र 2.कक्षः 3.पक्षः 4. पलिग्रहः 5– कोटि 6.मध्य–पृष्ठभागः 7–प्रस्थः।[102]

वैदिकभारतीयाः विभिन्नप्रकारेण सेनायाः वर्गीकरणंकार्येषु विशेषज्ञासन् ते सैन्यस्य वा सैन्यगठनस्य क्रियान्वित करणाय विशेषज्ञोऽऽसन्। तं सैन्यसंरचनायाः ज्ञानं किं वा सैन्यागठनस्य क्रियान्वयं व्यूहं इति उच्यते। यथा महाभारते पितामहभीष्मस्य वचनमस्ति – कतिपयव्यूहस्य नामानि तस्याकारेण आधारेण स्वीकृतानि। कतिपयव्यूहस्य नामानि व्यूहस्यकार्याधारेण स्वीकृतानि यथा –

1. मध्यभेदी व्यूहः –केन्द्रस्य भेदनं करोति।
2. अन्तरभेदी व्यूहः –शत्रुसैन्यस्य मध्ये गत्वा तस्य विभञ्जनं करोति।
3. अन्यञ्च – दण्डव्यूहश्च शकटो वराहो मकरस्तथा।
   सूचिव्यूहोऽथ गरुड़ः पद्मव्यूहादयो मतः।।[103]

शिवधनुर्वेदेऽपि कथितं यत् –

अर्धचन्द्रं चक्रश्च शकटं वराहो मकरस्तथा।
कमलं श्रेणिकां गुल्मं व्यूहानेवं प्रकल्पयेत्।।[104]

1.मध्यभेदी व्यूहः
2.अन्तरभेदी व्यूहः
3.मकरव्यूहः मकरस्याकारानुसारेण सैन्यरचना
4.स्येन व्यूहः (गरुडव्यूहः
5.शकटव्यूहः 6–अधचन्द्रव्यूहः
7.सर्वतोभद्रव्यूहः 6–गोमूत्रीकीव्यूहः(सोपानव्यूहः)
9.दण्डव्यूहः 10.भोजव्यूहः
11.मण्डलव्यूहः च।

एवं अनेकप्रकारस्य व्यूहाः सन्ति यथा महाभारते पितामहेन कथितं यत् –

सेनाकर्मण्यभिज्ञोऽस्मि व्यूहेषु विविधेषु च।

अन्यञ्च –

व्यूहानां च समारम्भान् दैवगान्धर्वमानुषान्।।[105]

**दण्डव्यूहः**–सर्वतोभये दण्डव्यूहः रचनाकार्या दशदिक्षु भयं प्राप्यते तदा स्वसैन्यरक्षणाय दडव्यूहं सेनां सेनापतिनायको व्यूहेयाताम्।

**आचार्य कौटिल्येन कथितं यत् –** यदा तिर्यग्वृत्तियुक्तं सैन्यं दर्शितं तदा तदनुसारेण सैन्यरचना इत्युक्ते दण्डव्यूहः।[106] यस्याः सेनायाः पक्षकक्षपृष्ठभागश्च समं बलयुक्तं भवेद् स दण्डव्यूहेति कथ्यते।[107] बाह्यस्पत्यानां मते यस्मात् व्यूहे सैन्यस्याङ्गानि पृथक–पृथकरूपेण भवति ते दण्डाकार–सर्पाकार–मण्डलाकार। संहितादि व्यूहाः पूर्वसूचितप्रत्यक्षक –क्षेत्रर्युक्त व्यूहद्वयस्य प्रकाराः सन्ति।[108]

दण्डव्यूहस्येव कक्षाभिक्रान्तः प्रदरः स्यात्। तत्रैव दण्डव्यूहे पक्षाभ्यां प्रतिकान्तः करणीयं स्यात् तर्हि दृढ़कव्यूहः कथ्यते।[109] स दण्डव्यूहे पक्षाभ्यां एवति क्रान्तः असह्यव्यूह नाम्नाः प्रचलते।[110]

यदा सैन्यस्य रचना दण्डव्यूहेऽस्मिन् तदा दण्डव्यूहे स्थित सैन्यस्य कोऽप्येकमङ्गे अन्याङ्गस्य पृष्ठभागे योजयेत् तदा स सूचीव्यूहरूपेण कथितं[111] एवमेव दण्डव्यूहमस्ति।[112]

**शकटव्यूहः** – पृष्ठतो भये शकटव्यूहम्। अर्थात् सैन्यस्य पृष्ठभागे भयस्य शंकास्ति चेत् शकटव्यूहस्य निर्माणं करणीयम्। अत्र शकटम् अर्थात् गाल्लीका किंवा कटिकम् शकटाकारं व्यूहम्। प्रथमे स्थाने द्वौ रथौ तत्पश्चात् सप्तगजाः पश्चात् विंशति गजाः स्थापयेत तेन् पश्चात् 50 अश्ववाहकाः समसंख्येषु रथगजेभ्यः शकटाकारं व्यूहस्य निर्माणं करणीयम्। वीरमित्रोदये तस्याकारस्य वर्णनं यथा –शकटव्यूहस्य मध्यभागे पैदलसेनायाः द्वारा संचलित व्यूहस्य भुजयोः वाह्यभागः अश्वेभ्यः संचालिताश्च। किल अस्मिन् व्यूहे स्थिते सैन्यस्य देवौरपि न पराजिता भवति।[113]

आचार्य कौटिल्यानुसारेण यदा गौमित्रकाव्यूहे पूरोभागे पंक्तिद्वयं स्थापयित्वा चतस्य यक्षौ दण्डव्यूहानुसारेण निर्मातव्यम् तदा शकटाव्यूहरूपेण कथितम्।[114] दैत्यगुरुणाशुक्रSणाऽपि कथितं यत्

शकटः शकटाकारो व्यालो व्यालाकृतिः सदा।[115]

**वराहव्यूहः –**

पार्श्वभागे वराहव्यूहः–दक्षिणवामपार्श्वयोर्भये उपस्थिते वराहव्यूहो।[116]

**गरुडव्यूहः** – महर्षिवशिष्ठानुसारेण–वराहगरुडोभयो व्यूहौ पार्श्ववामदक्षिणो उभर्योभये योजितव्यम्।[117]

आचार्य कौटिल्यानुसारेण–यक्षौ रचनानन्तरं उरस्याभिक्रान्तिन् श्येनव्यूहेति कथ्यते।[118] श्येनव्यूहाकारसैन्योपरि आक्रमणाय चापव्यूह रचितव्यमेति।[119]

गरुडखगाकाराकृत्यां एको रथोऽग्रे कर्तव्यः तदनन्तरं सप्तगजाः स्थापनीय पश्चात् 100 खड्गधारकेभ्यः 30 अश्वारोहिणां रक्षयितव्यम। गरुड व्यूहस्य पक्षद्वयं द्वौ–द्वौ गजाभ्यां आच्छाादितं करणीयम्।[120]

महर्षिणा शुक्रेण गरुडव्यूहस्य लक्षणं लक्षितं यथा 'सूक्ष्मग्रीवं–मध्यपुच्छं स्थूलपक्षं पंक्तितः बृहत्पक्षं दीर्घपार्श्वं मध्ये–मध्ये च पुच्छं, मुखेसूक्ष्मं तर्हि श्येनव्यूहं कथ्यते।

महाभारते युद्धस्य तृतीयदिने कौरवानां विजयाय पितामहेन भीष्मेण कौरवसरसेनापतिना गरुडव्यूहस्य रचना कृताः यथा –

गारुडं च महाव्यूहं चक्रे शान्तनवस्तथा।
पुत्राणां ते जयाकाङ्क्षी भीष्मः कुरुपितामहः।।[121]

तदनुरेण गरुडव्यूहस्य रचना –पितामहभीष्मो गरुडस्य तुण्डे तत्मस्तके स्थितः। भारद्वाजद्रोणः सात्वतकृतवर्माश्च चक्षुषी स्थानयोः उपस्थितौ। यशस्विनौ अश्वत्थामाकृपाचार्यश्चैव शीर्षमास्ताम्। त्रिगर्त–कैकेय –वाटधानश्चैव तत्रैव स्थितः। भूरिश्रवाः शल–शल्यो–भगदत्तो–मारिषो– मद्रका सिन्धु–सौवीराः पा×चनदाश्च ये सर्वाः जयद्रथेन सह ग्रीवायां संनिवेशताः। सहोदरैः सानुचरैः सह राजा दुर्योधनो तस्य पृष्ठे स्थितः। विन्दानुविन्दावन्त्यौ कम्बोजाश्च शकैः शूरसेनदेशस्य योद्धः सह तस्य महाव्यूहस्य पृष्ठे स्थितः।

मागधाकालिङ्गश्च दासेरकगणैः सह दक्षिणं पक्षंमासाद्य स्थिता। कारुषाश्चा विकुब्जाश्च मुण्डाः कुण्डीवृषाश्चा नृपेणबृहदबलेन सह वामपार्श्वेऽवस्थिताः।[122]

पञ्चमेदिने कौरवसैन्यस्य मकरव्यूहस्योत्तरे पाण्डवसेना मुनिम्यस्या श्येन व्यूहस्य निर्माणं करोति।

**मकरव्यूहः –**

यायाद व्यूहेन महता मकरेण पुरोभये।[123]

सैन्याग्रे भये मकरव्यूहो करकीयम्। अस्य व्यूहे चतुष्पादयुक्तो दीर्घस्थूलमुखं अधरद्वयसंयुक्तौ मकराकृति मकरव्यूहो स्थितः। [124]

आचार्य कौटिल्यानुसारेण शकटव्यूहः विपर्यये मकरः।[125] महाभारतस्य युद्धस्य पञ्चमदिने पितामहेन भीष्मेण मकरस्य व्यूहस्य रचना कृता। यथा –

अरक्षन्मकरव्यूहं भीष्मो राजन् समन्नततः।
तथैव पाण्डवा राजन्नरक्षन व्यूहमात्मनः।।[126]

कौरवासेनायाः सेनापतिना कर्णेन स्वसेनायां मकरव्यूहो निर्मितः यथा–

व्यूहं व्यूह महेष्वासो मकरं शत्रुतापनः।
प्रत्युद्ययौ तथा कर्णः पाण्डवान् विजिगीषया।।[127]

तदनुसारेण मकरस्य तुण्डे तु कर्णः नेत्राभ्यां शूरवीरौ शकुनिश्च तस्यपुत्रो उलूकश्च द्रोणपुत्रोऽश्वत्थामा शिरसि च ग्रीवायां सर्वसहोदरः आवृताः। मध्ये राजादुर्योधनेन महता बलेन वृत्तः। तत्र मकरव्यूहस्य वामपादे नारायणसैन्यौः युक्तो गौपाकैः सह कृतवर्मा व्यवस्थितः। व्यूहस्य दक्षिणपादे महाधनुर्धर त्रिगताश्च दाक्षिणात्यैरावृतोऽऽचार्यकृपाचार्यश्च संवृत्तौ। वामानुपादे मद्रदेशस्य सैन्येन सह शल्यराजः स्थितः। दक्षिणानुपादे रथसहस्रेण दन्तिनां चावृत्तौ सत्यप्रतिज्ञासुषेणोपस्थितः। पृच्छविभागे पार्थिवौ द्वौ भ्रातरौ चित्रश्च चित्रसेनश्च महती सेनया आवृत्तौ।[128]

**पद्मव्यूहः –** वीरमित्रोदये पद्मव्यूहस्य वर्णनम् यथा–

अन्तरे रथमेकैकं स्थानेष्वसु कल्पयेत्।
तदन्तरे गजान् पञ्च नवाश्वा स्थापयेत् ततः।।
ततः पतीन् पञ्चदश पत्रे–पत्रे प्रकल्पयेत।
तनमध्ये स्यदान्नान् सप्त गजांश्चैच त्रयोदशः।।
एकोनविंशति ह्यान् पदातीनिष्टं विंशतिम्।
तन्मध्ये गजमारूढ़श्चमूषो वा नृपऽथ वा।।
गजैः रथैः पूरणीयाः पद्यमध्यस्य कर्णिकः।
अन्तरे द्राणिकायां तु रथा द्विरदवाजिनाः।।
स्त्रयत्रश्च सर्वत्र त्रयत्रिंशत् पदातयः।
पद्मव्यूहः स विज्ञेयः पद्माकरो कृतो यतः।। [129]

**पपीलिका व्यूहः –**

सेनाया पूर्वे भयः स्यातु पिपीलिकायाः।

पंक्त्यानुसारेण व्यूहस्य रचना करणीयम्।।[130]

**क्रोञ्चव्यूहः** –यथा आकाशे क्रौञ्चनो पक्षीणां यादृक सदृशं पंक्तिबद्धेन गतिः जायते तादृशी स्थानीयबलानुसारेण क्रौञ्चाख्यसैन्यसंस्थानं सञ्चारयेत्।[131]

महाभारते कुरुक्षेत्रस्ययुद्धे क्रौञ्चव्यूहस्य प्रयोगंकृतमस्ति। तदनुसारेण क्रौञ्चव्यूहो किं वा क्रौञ्चारुणव्यूहो समस्तशत्रुसैन्यस्य संहारकोऽस्ति। देवासुरसंग्रामे देवगुरुणा बृहस्पतिना इन्द्राय अकथित।[132] तथैव युधिष्ठरस्यादेशानुसारेण पाण्डवसेनापतिदृष्टद्रुम्नेन बार्हस्पत्येन विधिना क्रौञ्चव्यूहस्य निर्माणं कृतम्। तत्र व्यूहस्य शिरोऽभूद् राजा द्रुपदः स्वसेनया सह कृतिभोजद्दष्टकेतु तौ द्वौ जनेश्चरौ चक्षुभ्यां स्थितौ। दाशार्णकाः दाशेरकगणैः सह प्रभदाः अनुपका किराताञ्च ग्रीवायामावृताः।

पटच्चरैश्च पौण्ड्रैकश्च पौरवकैः निषादैः सह राजायुधिष्ठिरो पृष्ठभागे स्थितवन्ताः। पक्षौ तु भीमसेनश्च धृष्टद्युम्नञ्च पार्षतः। द्रौपदेयभिमन्युश्च सात्यकिश्च पिशाचाः च दारदाश्चैव पुण्ड्राः कुण्डविषाश्च मारुताश्च धेनुकाश्चैव तड्गणाश्च परतड्गणाश्च बह्लिकास्तिरातिशयाः च चोक्ताः पाण्डवाश्चैव एते जनपदानां सैनिकाः दक्षिणं पद्यमाश्रिता। अग्निवेश्चैव च हुण्डाश्च मालावादानभारयश्च शबरा–उद्साश्चैव वत्साश्च नाकुलादीनां जनपदानां सैनिका नकुलसहदेवेभ्यः सह वामयक्षं समाश्रिताः।[133]

| | |
|---|---|
| क्रौञ्चव्यूहस्य पक्षे | 10,000 |
| शिरोभागे | 1,00,000 |
| पृष्ठभागे | 1,00,200,00 (1 अर्बुद 20,000 |
| ग्रीवाभागे | 1,70,000 रथा स्थिताः।[134] |

पक्ष कोटिप्रचक्षेषु पाक्षान्तेषु चलन्तस्थितपर्वता इव सहस्रगजाः जग्मुः।[135] कैकेयः सह नृपो विराटव्यूहस्य जघनं रचयामास।[136]

**व्यालव्यूह वा सर्पव्यूहः –** सर्पाकारेण सैन्यस्य व्यूहरचनाव्यवस्थां व्यालव्यूहेति कथ्यते।[136] महाभारते युद्धे चतुर्थदिने कौरवसेनायां पितामहभीष्मेण व्यालव्यूहे रचितः। तं सैन्यं कपिराजकेतरार्जुनो दूरात ददर्श व्यालव्यूहो कौरवसेनायाबद्धं तेन कारणेन अनेक नानाविधप्रकारयुक्तं

गूढसारं दृश्यते। तं सैन्यं गजाश्वपादात्यादिनामुपकरैः सम्पूर्णं दृश्यते। तं व्यालव्यूहं महामेधसमं भाषते।[137]

वीरमित्रोदये तस्य संघटना कथिता यथा –

चतुर्दिक्षु रथौ द्वौ तत् पृष्ठे द्विरदा गजोदेशः।
चतुर्विंशतिरश्वाश्च त्रिंशत खडगदशधरस्ततः।।
शरचापधरास्तश्चैव खेटपट्टिशधारिणः।
तेषां पृष्ठे कुन्तीधराः यन्त्र धरास्तथैव च।।[138]

**शृङ्गाटक व्यूहः** – महाभारते युद्धे अष्टमेदिने पाण्डवसेनायां श्रृ›ाटकव्यूहस्य निर्माणं कृतम्। यथा –

श्रृ›ाभ्यां भीमसेनश्च सात्यकिश्च महारथः।
ताभ्यां बभौ नरश्रेष्ठः श्वेताश्वः कृष्णसारथिः।।[139]
मध्ये युधिष्ठरो राजा माद्रिपुत्रौ च पाण्डवौ।।[140]
अथोतरे महेष्वासः सहसैन्या नराधिपाः।
व्यूहं ते पूरयामासुर्व्यूहशास्त्रविशारदाः।।[141]
अभिमन्युस्ततः पश्ष्चाद् विराटश्च महारथाः।
द्रौपदेयाश्च सह्रुष्टा राक्षसश्च घटोत्कचः।।[142]

**सूचीमुख व्यूहः** –सूक्ष्ममुखः दीर्घस्य दण्डस्यान्ते छिद्रसमन्वितो। व्यूहो इति सूचिव्यूहो कथ्यते।[143]

**सर्वतोभद्र व्यूहः** – चतुर्दिक्षुः अष्टधामण्डलीकृतः मार्गहीनः अष्टवलययुक्तः गोलाकारः सर्वतोमुखं तादृशं सैन्यविन्यासं सर्वतोभद्रव्यूहेति ज्ञायते।[144] महाभारते नवमेदिने युद्धे पितामहेन भीष्मेण सर्वतोभद्रव्यूहो निर्मितः।[145] यथा–

कृपश्च कृतवर्मा च सैष्यश्चैव महारथः।
शकुनिः सैन्धवश्चैव काम्बोजश्च सुदक्षिणः।।
भीष्मेण सहिताः सर्वे पुत्रैश्च तव भारत।
अग्रतः सर्वसैन्यानां व्यूहस्य प्रमुखे स्थिताः।।
द्रोणो भूरिश्रवाः शल्यो भगवदश्च मारिषः।
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य दंशिता।
अश्वत्थामा सोमदत्तश्चावन्त्यौ च महारथौ।
महात्या सेनया युक्ता वामं पक्षपालयन्।
अलम्बुषो रथश्रेष्ठः श्रुतायुश्च महारथः।
पृष्ठतः सर्वसैन्यानां स्थितौ व्यूहस्य दर्शितौ।। [146]

**मण्डलव्यूहः** —महाभारते सप्तमे युद्धदिने पितामहेन मण्डलव्यूहो निर्मितः।[147]

सम्पूर्णं योधमुखैश्च तथा दम्पितपदातिभिः।
स्पश्नेकसहस्रैः समन्तात् परिवारितम्।।
अन्वश्वं दश धानुष्का धानुष्के दश चर्मिणः।
एवं व्यूहं महाराज तव सैन्यं महारथैः।।[148]

**वज्रव्यूहः** —कौटिलीयार्थशास्त्रे एवं व्यूहं कर्काटकश्रृंगी किं वा अधर्मद्रिक्रं नाम्रतः। वर्णितम्। अस्य व्यूहस्य रचना अर्जनेन कृता। यथा —

व्यूढं दृष्टवा तु तत् सैन्यं सव्यसाची परं तपः।
धृष्टद्युम्नेन सहितः प्रत्य व्यूहत संयुगे।।[150]

अस्य व्यूहस्य रचना यथा —

अर्धचन्द्रेण व्यूहेन व्यूहं तमतिदारुणम्।
दक्षिणं श्रृंगमास्थाय भीमसेनो व्योरोचत्।।
नाना शल्स्त्रौघसम्पन्नैर्नाना देश्यैर्नृपैवतः।
तदन्वेव विराटश्च द्रुपदश्च महारथः।।
अभिमन्युस्ततः शूर इरावांश्च ततः परम्।
भैमसेनिस्ततो राजन् कैकयाश्च महारथाः।
ततोऽभद्र द्विपदां श्रेष्ठो वामं पाश्वमुपाश्रितः।।
मीलादननीरश्चैव धृष्टकेतुर्महाबलः।
चेदिकाशीलरुषैश्च पौखेरापि संवृतः।।
धृष्टद्युम्नः शिखण्डी च पांचालाश्च प्रभद्रकाः।
मध्वे सैन्यस्य महतः स्थिता युद्धाय भारतः।।
तत्रैव धर्मराजोऽपि गजानिकेन सृवृतः।
ततस्तु सात्विकराजन् द्रौपद्याः पञ्चचात्मजा।।
सर्वस्या जग्रतो गोप्ता यस्य जनार्दमः।
एवमेतं महाव्यूहं प्रत्युव्यूहन्त पाण्डवाः।।[151]

**सिंहव्यूहः** —सिंहव्यूहस्यवर्णनं वीरमित्रोदये प्राप्यते। यथा —

अग्रेरथत्रयं पृष्ठे गजाकारो गजव्रजः।
स्यन्दनाः पञ्चपञ्चैव अयो षष्ठिर्धनुष्मताम्।।
मध्ये पदातयः षष्टिः पार्श्वयो रथिनो गजाः।
षष्ठे तु सकलासेना सिंहव्यूहः प्रजायते।
शकट व्यूहे कालेऽयं सूचीव्यूहेन भिद्यते।।[152]

पद्मव्यूहस्य भेदनाय् सिंहव्यूहं निर्मितं च सूचीव्यूहो भेदनाय काकव्यूहो निर्मितम्।[153]

**अग्निव्यूहः** – अस्याग्निव्यूहस्य वर्णनमपि तत्रैव प्राप्यते। यथा –

सप्तधा स्युः सप्त गजवाजिपदातयः।
रथेभारवाः मत्तयश्च सप्त–सप्तगुणाः क्रमात।।
सर्वोत्तमेऽयं व्यूहानामाग्निवन्नाशकारकः।
अधोऽधः कल्पयेदवमग्निव्यूहः स उच्यते।।[154]

**चक्रव्यूहः –** दैत्यगुरुणा शुक्राचार्येण अस्य चक्रव्यूहस्य रचना प्रदर्शिता। यथा – योऽष्टधा वर्तुलाकारेण वेष्टितः। एक एव मार्गेण तन्मध्ये प्रवेशमियमस्ति स चक्रव्यूहेति कथ्यते।[155]

वीरमित्रोदये यथा –

गजषोऽशकं मध्ये वृत्ताकारेण कल्पयेत।[156] पाण्डवसेनायां तु अर्जुनो वा कृष्णो वाभिमन्युः वा प्रद्युम्न चतुर्थपुरुषाः एवास्य व्यूहं जानन्ति।[157] महाभारते यदा सारथिकृष्णेनसहार्जुनो संशप्तकैः सह युद्धाय गतः तदा आचार्येण द्रोणेन चक्रव्यूहोऽभिकल्पितः।[158] यथा –

आरास्थानेषु विन्यस्ताः कुमाराः सूर्यवर्चस्वः।
संघातो राजपुत्राणां सर्वेषामश्वतः तदा।।
दुर्योधनस्तु राजेन्द्र सेनामध्ये व्यवस्थितः।
प्रमुखे तस्य सैन्यस्य द्रोणाऽवस्थित नायकः।।
सिन्धुराजस्य पार्श्वस्था अश्वत्थामा पुरागमाः।
सुतास्तव महाराज त्रिंशत्दिशसंनिभाः।।
गान्धराजः कितवः शल्यो भूरिश्रवास्तथा।
पार्श्वतः सिन्धुराजस्य व्यराजत्ः महारथाः।।[159]

**मुक्त–आयुधानि –**

धनुः, इषुः, भिणिववः, शक्तिः, द्रघ्रण, तोमरः, नालिका, लुङ्ग, पाशः, चक्रं, दन्तकण्टाः, भुसुण्डीतिः द्वादशैते मुक्तभेदाः प्रकीर्तिताः।[160]

**अमुक्त–आयुधानि –**

वज्रम, ईली, परशुः, गोशीर्षम्, असि, धेनुका, कुन्तः, स्थूणः, प्रासः, पिनाककः, गदा, मुदगर, सरिः, च मुसकः तथा मौष्टिकं, पारिधं, चैव मयूखी च शताधिकाः अमुक्तका विंशतिरिमे द्वितीयः पद उच्यते।[161]

महाभारते कतिपयशस्त्राणां प्रयोजनं प्राप्यते । यथा –

1. आग्नेयास्त्रम्।

2. वारुणास्त्रम्।

3. वायव्यास्त्रम्।

4. पर्जन्यास्त्रम्।

5. भौमास्त्रम्।

6. पर्वतास्त्रम्।

**हस्तमुक्तायुद्धाानि –**

रणयुद्धे हस्तात् प्रहारयोग्यायुद्धानि – किं वा क्षेपनीयानि आयुधानि सन्ति। तद्यथा –

| | | |
|---|---|---|
| पट्टीशः | तोमरः | त्रिशूलम् |
| शक्तिः | मुदगरः | पाशः |
| भुसुण्डिः | कम्पन | परिधः |
| अरानि | दण्डः | वार्णी |
| क्षुरप्रिः | ऋष्टिः | वत्सदन्तः |
| असि | वराहकर्णः | भिन्दिपालः |
| शिलिमुख | पिपाठः | अंकुशः |

एतानि आयुधानि अमुक्तायुनि रूपेणामपि ज्ञायते।

**त्रिशूलम् :–**

अपराजितपृच्छाायां त्रिशूलस्य लक्षणम् ईदृशं वर्तते –

षोडशाख्यं पदं कृत्वा पदेन नाभिवृष्टम्।
त दूर्ध्वे चोमयपक्षौ भीष्णाग्रौ प्रकीर्तितौ।।
एत्तास्त्रांशशक्तिपिण्डवलनं कण्टकावृतम्।
उभयोः वाटाकोपेतो मध्ये शक्तयंश अन्नतः।
दशाभागर्भवेद् पृथुत्वं चैकभागिकम्।[162]

**मन्त्रमुक्तमायुधानि :–**

विष्णुचक्र, वजास्त्र, ब्रह्मास्त्र, कालपाश, नारायणास्त्र, पाशुपतास्तिादि अस्त्राणि मन्त्रेण नियोज्य शत्रुसंहारं वा समस्तसृष्टयाः संहारं कर्तमसमर्थाजात।[163]

धनुर्वेदसंहितायां विभिन्न अस्त्रशस्त्राणां चर्चा प्राप्यते। यथा–ब्रह्मदण्डः, ब्रह्मशिरः, वायव्यास्त्रम्, आग्नेयास्त्रम् इत्यादयः।

कौटिल्यार्थशास्त्रे भोगव्यूहः, मण्डलाकारव्यूहः, असंदनव्यूहः, दृढक्व्यूहः, अक्ष्सह्यव्यूहः, चापव्यूहः, चापकुक्षिव्यूहः, सुप्रतिष्ठव्यूहः, संजयव्यूहः, स्थूलव्यूहः, विशालविजयव्यूहः, चमूमुखव्यूहः, सर्वताभेद्रव्यूहः,

गोमित्राकर्णकाव्यूहः, अष्टानीकव्यूहः, दुर्जयव्यूहः, गोध्तव्यूहः, काकपदीव्यूहः, अर्धचन्द्रिकाव्यूहः, कर्काटकश्रृंगीव्यूहः, अचलव्यूहः, प्रदरव्यूहः, दृढकव्यूहः असह्यव्यूहः इत्यादिभि व्यूहानि तेषां रचनां च प्रदर्शितानि सन्ति। [164]

# सन्दर्भ–सूची


**1.** महाभारत – आदिपर्व – 220/74

**2.** धनु. संहिता – 1/2,
तत्र चतुष्टयपादात्मको धनुर्वेदः।
यस्य प्रथमेपादे दीक्षाप्रकारः।
द्वितीयेसंग्रहः तृतीयेसिद्धप्रयोगः, चतुर्थे प्रयोविधयः।

**3.** चतुष्पादं धनुर्वेदं वदे प×चविधं द्विजः।
रथनागाश्वपत्तीनां योधाश्चाश्रित्य कीर्तितम्।।
अग्नि–248/1

**4.** अग्निपुराणे – 248/2

**5.** महाभारते – आदिपर्वे – 220/74, नीलकण्ठटीकायां

**6.** नीतिप्रकाशिकायां – 2/11

**7.** धनुष्चक्र×च कुन्त×च खण्डग×च छुरिका गवा।
सप्तमं बाहुयुद्धं स्यादेवं युद्धानि सप्तधा।। धनु.–1/1

**8.** आचार्यः सप्तयुद्धः स्याच्यतुर्भिर्भार्गवः स्मृतः।
द्वाभ्याश्चैव भवेद् योद्धा एकेन गणको भवेत्।। शिव.–1/1

**9.** आविभ्रतोः शत्रुभावेमुमयोः संयतात्मनोः।
अस्त्राद्यैः स्वार्थसिद्धयर्थं व्यापारो युद्धमुच्यते।।शुक्र.
–4/7/220

**10.** मन्त्रास्त्रैदैविकं युद्धं नालाद्यस्त्रैस्तथाऽऽसुरम्।
शस्त्रबाहुसमुत्थन्तु मानवं युद्धममीरितम्। 221

**11.** दृष्टव्य – महाभारते भीष्म–कर्णपर्वणि

**12.** महाभारते – द्रोणपर्व–115/39

**13.** महाभारते – द्रोणपर्व–115/46

**14.** महाभारते – द्रोणपर्व–91/38,39

**15.** महाभारते–अदिपर्वे – 131/62, असि कर्मणौ निष्णातौ चमौ
सत्वतो वरौ। महा.आदि–131/62

**16.** महाभारत – आदि. –131/60

**17.** महाभारत–शल्य.–57/19–20

**18.** महाभारत–सभा – 22 / 23 अध्याये

**19.** एभिर्धिनैश्च शिष्याय गुरुः शस्त्राणि दापयेत्।
सन्तर्प्यदान होमाभ्यां सुरान् शास्त्रविधानतः।
शिष्याय मानुषं चायं धनुर्वेदाभिमन्त्रितम्।
काण्डात्काण्डेति मन्त्रेण दधाभेदविधानतः।। शि.धनु. 1 / 14–15

**20.** शिव / धनु. 1210–13, धनु / 1 तः 13

**21.** गुणानां लक्षणं – वक्ष्ये यादृशे कारयेतं गुणम्।
यदृसूत्रो गुणः कार्यः कनिष्ठामानसम्मितः।।
वर्णितः स्यादगुणः सूक्ष्मः सर्वकार्य सहो युधिः।
पट्टसूत्रैः गुणः कार्यः कनष्ठिामानसम्मितः।।
शिव. धनु. –1 / 38–39 / व.धनु. 1 / 51–52

**22.** अभावे यदृसूत्रस्य हरिणीश्नायुरिष्यते।
गुणार्थमपि च ग्राह्या स्नायवो महिषी भवाः।
तत्कालहतदात्रस्य तन्तुना वा गुणः शुभाः।।
निलोमतन्तुसूत्रेण कुर्याद्ध गुणमुतम्।। वा.धनु. 1 / 51–53

**23.** शिवधनुर्वेदे – 1 / 40–41

**24.** वा. धनु. सं. / 1 / 54

**25.** शिव. धनु. – 1 / 42

**26.** शिव. धनु. – 1 / 43–44

**27.** वा. धनु. – 1 / 24–25

**28.** शिव. धनु. – 1 / 16–18

**29.** इषु फले तु शरवंशामूलालेपनाद्। यस्मिन् शरवंशसमूहे स्वातिविन्दुनर्निपोत स पितवर्णो भवति। तस्य मूले विषमुत्पद्यते तन्मेलं ग्राह्यं च। स च सर्वदा पवनाभावेऽपि कम्पते।

वा.धनु.1 / 61

**30.** फलस्य पावनं वक्ष्ये दिव्यौषधिविलेपनैः।
येन दुर्भेद्यवर्म्माणि भेदयेत्तरुपर्णवत्।।

पिप्पली सैन्धवं कुष्टं गोमूत्रेतु सुपेषयेत्।
अनेन लेपयेत शस्त्रं लिप्तं चाग्नौ तप्रतापयेत्।।.

**31.** शिवधनुर्वेदे – 1/1/56–57

**32.** शिवधनुर्वेदे – 1/58

**33.** सौवर्चलं सैन्धवं विहमौद्भिमदमेव च।
सामुद्रेण सहेतानि यञ्च स्युर्कवणानि च।। चं.सं.सूत्र–

**34.** शिव.धनु. –1/62

**35.** वा. धनु. 1/78

**36.** शिव. धनु. 1/63

**37.** हलाकृतिमिवं पञ्चस्तवजानूरुदक्षिणम्।
वितस्त्यः पञ्चविस्तारे तदालीढं प्रकीर्तितम्।।अग्नि.–अ. 249/22

**38.** वा. धनु. 1/77

**39.** शिव. धनु. 1/64

**40.** अग्निपुराणे –249/13

**41.** बाहयाङ्गुलिस्थितौ पादौ स्तब्धजानुबलावुभौ।
त्रिवितस्त्यन्तरास्थानमेतद् वैशाखमुच्यते।। अग्नि. –249/13

**42.** शिव. धनु. 1/65

**43.** वा. धनु. 1/79

**44.** शिव. धनु. 1/66, वा. धनु. 1/80

**45.** शिव. धनु. 1/67

**46.** वा. धनु. 1/81

**47.** अग्निपुराणे – 249/14

**48.** पद्मासनं पसिद्धस्तु उपविश्य यथाक्रमम्।
धन्विनां तत्तुविज्ञेयं स्थानकं शुभलक्षणम्।।, वा.धनु.–1/83

**49.** शिव. धनु. 1/9

**50.** अग्निपुराणे 249 /15,16

**51.** अग्निपुराणे – 249/11

**52.** अग्निपुराणे – 249/17

**53.** शिव. धनु. 1/70

**54.** वा.धनु.सं.–1/84 –89, शिव–1/70–74

**55.** संधानं त्रिविणं प्रोक्तमध्यमण्वसमतथा।
योजयेत्रिप्रकारेहि कार्येष्वपि यथाक्रमम।।शिव. धनु. 1/70–75

**56.** अधश्च दूरपातित्वे समे लक्ष्येषु निश्चले। शिव – 1/75
दृढ़स्फोटं प्रकुर्वीत् उर्ध्वसंन्धानयोगतः।। वा. धनु. 1/71

**57.** कैशिकः केशमूले वै शरः श्रृंगे च सात्विकः।
श्रवणे वत्सकर्णश्च ग्रीवायां भरतो भवेत्।
अंसके स्कन्धनामा च व्यायाः पञ्च प्रकीर्तिताः।।
वा.धनु.सं–1/92–93

**58.** कौशिकश्चित्रयुद्धेषु अधोलक्ष्येषु सात्विकः।
वत्सकर्णः सु विज्ञेयो भरतो दृढ़भेदेन।
दृढ़भेदे च दूरे च स्कन्धनामानमुद्दिशेत्।। शिव.धनु. 1/78–79

**59.** लक्ष्यं चतुर्विधं ज्ञेयं स्थिरं चैव चलन्यथा।
चलाचलं द्वयचलं वेधनीयं क्रमेण तु।। वा.धनु.–1/65

**60.** शिव. ध. –1/80

**61.** आत्मानं सुस्थिरं कृत्वा लक्ष्यं चैव स्थिरं बुधः।
वेधयेत्रिप्रकारं तु स्थिरवेधी स उच्यते।। वा . धनु. 1/81

**62.** चलं तु वेधयेद् यस्तु आत्मना स्थिर संस्थितः।
चललक्ष्यं तु तत्प्रोक्तमाचार्येण सुधीमता।। वा. धनु.1/82

**63.** शिव. धनु. 1/83

**64.** वा. धनु. 1/98

**65.** वा. धनु. 3/1–5, शिव. धनु. 1/90–91

**66.** शिव. धनु. – 1/97

**67.** शिव. धनु. – 1/97–100

**68.** वा. धनु. 2/47–51
**69.** शिव. धनु. 1/69
**70.** वा. धनु. –सं.–35
**71.** महाभारत, भीष्मपर्व–196/8–11
**72.** महाभारत, भीष्मपर्व–196/6–8
**73.** वा.धनु. –सं. /36
**74.** महाभारत, भीष्मपर्व–195/3–4
**75.** धनु.सहिता––37
**76.** महाभारत, भीष्मपर्व–76–77
**77.** महाभारत, भीष्मपर्व–397/78–80
**78.** महाभारत, द्रोणपर्व–192/51–55
**79.** धनु. सं. 38–39
**80.** आहवेषु मिथोऽन्योन्यां जिंघासन्तो महीक्षितः।।
युद्धयमानाः परं शक्त्यां स्वर्गं यान्त्यपरामुखाः।
शुक्र.–4/7/308
**81.** मुतुरर्थे च यः शूरो विक्रमेद्वाहिनी मुखे।
भयान्तः विमिवर्तेत तस्य स्वर्गो ह्यन्तकः।।शुक्र.
–4/7/310
**82.** आहवे निहतं शूरं न शोचत् कदाचन्।
निर्मुक्तं सर्वपापेभ्यो पूतो याति सुलोकताम्।
वराप्सरः सहस्राणः शूरामाचोद्यते।।
**83.** महाभारते /भीष्म.–107, /70–71
**84.** धनुर्वेद – 4/45
**85.** महाभारते /भीष्म.–26/37
**86.** व्यूहयित्वाग्रतः शूरान् स्थापयोज्जलिप्यसया।
पृष्ठेन वायवो वासि पृष्ठे भानुवयांसि च।। वा.धनु.–4/43
**87.** धनु.वा. 45
**88.** अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा यापमवाज्स्यसि।।
महाभारते – भीष्म–26/37

**89.** महाभारते भीष्म–26/33

**90.** महाभारते – भीष्म–26/34

**91.** वा. धनु –4/46 , 91– (अ½दृष्टव्य – पादटीप–22

**92.** महाभारते उद्योग – 157/7

**93.** महाभारते भीष्म–122/26

**94.** अधर्मः क्षत्रियस्यैद्यः यच्छस्यामरणं भवेत्।
विसृजतन् श्लेषपित्तानि कृपाणां परिवेदनम्।।
अविक्षतेन देहेन प्रलयं योऽधिगच्छति।
क्षत्रियो नास्य त् कर्म प्रशंसन्ति पुरामिवदः।।
शुक्र. 4/7/305–306.

**95.** न गेहे मरणं शस्तं क्षत्रियाणां विना रणात।
शौण्डीराणामशौण्डीरमधर्मं कृपण हि तत् ।
शुक्र–4/7/307

**96.** रणेवकुदनं कृत्वा ज्ञातिभिः परिवारितः।
शस्त्रास्त्रै सुविनिभिन्नः क्षत्रियो वध्मर्हतिः।। शुक्र./308

**97.** रामायणे युद्धे– 4/9/15

**98.** रामायणे –युद्धे – 4/ 16, 17, 20, 34, 35

**99.** उत्तिष्ठ त्वं देवजनार्बुहे सेनया सह।
भञ्जन्नमित्राणां सेनां भोगो भिः।। अर्थ– 11/9/5

**100.** रामायणे –युद्धे – 21/12

**101.** शशास कपिसेनां तां बकादयादाय वीर्यवानृ।
अंगद सह नीलेन तिष्ठेदुरसि दुर्जयः।।

**102.** तिष्ठेद् वानरवाहिन्या वानरीधसमावृताः।
आश्रितो दक्षिणं पार्श्वमृषभो नामर्वानरः।।
गन्धहरितंदुर्धस्तस्वी गन्धमादनः।
तिष्ठेद वानरवाहिन्याः सव्यं पार्श्वमधितिष्ठति।।

**103.** रामायणे –युद्धे – 24/14–17

**104.** व.संहिता –4/48 /105, शिवधर्नुवेद – 176

**105.** महाभारते –उद्योग–165/8,10

**106.** वसिश्ठ–धनु. 4/50

**107.** तत्र तिर्यग्वृत्तिदण्डः। अर्थशास्त्रे–10/6

**108.** प्रक्षकक्षारेस्यैः समं वर्तमानो दण्डः।

**109.** प्रपक्षकक्षोरस्या उभयोः दण्डभोगमण्डलासंहिताः
प्रकृतिव्यूहः।
अथर्व–10/6 तत्रैव

**110.** सकक्षाभिक्रान्तः प्रदरः तत्रैव अर्थशास्त्रो।
स एव पक्षाभ्यां प्रतिक्रान्ती दृढ़कः।।

**111.** तत्रैव – 1/6

**112.** उर्ध्वराजिदण्डः सूचिः तत्रैव अर्थशास्त्रे

**113.** अर्थशास्त्रे – 10/6, स युग्मोरस्यो दण्डपक्षः शकटः।

**114.** शुक्रनीति – 4/7/283, स सर्पसारी गोमूत्रिकावा।
स युग्मोरस्यो दण्डपक्षः शकटः।।

**115.** वा. धनु. – 4/50

**116.** वा. धनु –4/51

**117.** तत्रैव –

**118.** पक्षाववस्थाप्योरस्याभिक्रान्तः श्येनः –अथर्ववेद–10/6
दृढ़ामसक्ष्येन श्येनं चापेन – तत्रैव –पृ.–778

**119.** वीरमित्रोदय –

**120.** शुक्र – 4/7/280

**121.** महाभारते – 56/3

**122.** गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव।
चक्षुषी च भरद्वाजः कृतवर्मा च सात्वतः।।

———————————

मागधाश्च काकिड्गाश्च दासेरकगणैः सह।
छक्षिणं पक्षमासाथ स्थिता व्यूहस्य दर्शिताः।।

**123.** महाभारते – भीष्म –46/3–9

**124.** शुक्र–4/7/265

**125.** शुक्र–4/7/281

**126.** अर्थ – 10/6

**127.** महीाारते– भीष्म –67/4

**128.** महाभररते कर्ण 13/14

**129.** वीरमित्रोदये – 16/20

**130.** वा. धनु.–4/51

**131.** क्रौच्चानां खे गतिर्यादृक पंक्तिशः सम्प्राप्यते।
तदृक सञ्जारयेत् क्रौच्चव्यूहः देश बकं यथा।।
शुक्र–4/7/279

**132.** व्यूह क्रौच्चारूणो नाम सर्वशत्रुमुनिर्बहुन।

यं बृहस्पतिरिन्द्राय तदा देवासुरेऽब्रबीत्।।

**133.** चोक्तं स नृपेदेवेन विष्णुर्ववज्रभृता मता।
बार्हुस्यतेन विधिना व्यूहमार्गविचक्षणः।।
स्थानामयतं यक्षौ शिरस्त नियुक्तं तथा।
पृष्ठतबुधमेवासीत सूक्ष्मेणि च विंशति।।

**134.** महाभारत–भीष्म – 50/41, 42, 46तः 54

**135.** तत्रैव

**136.** महाभारत भीष्म– 50/54

**137.** तत्रैव

**138.** व्यालको व्यालाकृतिः सदा। शुक्र –4/7/283

**139.** महाभारते भीष्म – 50/7

**140.** वीरमित्रोदय – राज–22 तः 24

**141.** महाभारत – भीष्म – 87 /18 तः 21

**142.** शुक्र – 4/7/281

**143.** शुक्र – 4/7/282–83

**144.** महाभारते – भीष्म – 99 /2 –7

**145.** महाभारते भीष्म – 81–82

**146.** महाभारते भीष्म – 81/15–15

**147.** महाभारते भीष्म – 81 / 22–23

**148.** महाभारते भीष्म – 56/10

**149.** महाभारते भीष्म –56 /11 तः 18

**150.** वीरमित्रोदय – राज– 9–11

**151.** पदमव्यूहस्तु सिंहेन सूची काकेन भिद्यते–वीर.–राज, –9–11

**152.** वीरमित्रोदय– राज– 25–26

**153.** वीरमित्रोदय– राज– 9,10,11

**154.** वीरमित्रोदय– राज– 25–26

**155.** शुक्र–4/7/282

**156.** वीरमित्रोदय – राज – 12

**157.** महाभारत – द्रोण – 35/15

**158.** महाभारत / द्रोण – 34/14

**159.** महाभारत – द्रोण – 34 / 14, 19, 21, 22, 23, 36

**160.** धनुरिषुभिंण्डिवालश्शक्तिद्रुधणतोमराः।
नलिका लगडुः पाशचक्रं वै कणृकः।
मुसुंडीति द्वादशौ मुक्तभेदाः प्रकीतिताः।
वज्रमीली च परशुगोशीर्षमसिधेनुका।।
नीतिप्रकाशिकायाम् –2/17–18

**161.** वज्रमीली च परशुगोशीर्षमसिधेनुका।
लवित्रमास्तरः कुन्तस्सूणिः प्रासः पट्टिशं तथा।।
नीतिप्रकाशिकायाम् –2/21

**162.** अपराजित. – 235/14

**163.** विष्णुचक्रं वज्रमस्त्रं, ब्रह्मास्त्रं कालपाशकं।
नारायणं पाशुपतं नाशाम्यमितशस्त्रकैः।। नीति. 2/40

**164.** कौटिलीय अर्थशास्त्रे – 10/6